अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायां। द्विगोर्लुकमुक्तं। क्किमुक्तं। तत्र तावदुक्तं द्विगोर्लुकि तन्निमित्तग्रहणं अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपीति। इहापि द्विगोर्लुकि तन्निमित्तग्रहणं कर्त्तव्यं द्विगोर्निमित्तं यस्तद्धितः तस्य लुक्प्रवृत्तीति वक्तं। इह माभूत् द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं द्विशूर्पेण क्रीतं द्विशौर्पिकं त्रिशौर्पिकं। अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपि। अर्थविशेषस्यासंप्रत्ययेऽतन्निमित्तादपीति वक्तव्यं। किं प्रयोजनं। द्वयोः शूर्पयोः समाहारः द्विशूर्पी द्विशूर्प्या क्रीतमिति विगृह्य द्विशूर्पमित्येवं यथा स्यात्। अथ क्रियमाणेपि तन्निमित्तग्रहणे कथमिदं विज्ञायते। तस्य निमित्तं तन्निमित्तं तन्निमित्तादिति आहोस्वित्स निमित्तं यस्य सोयं तन्निमित्तः तन्निमित्तादिति। किं चातः। यदि विज्ञायते तस्य निमित्तं तन्निमित्तं तन्निमित्तादिति। क्रियमाणेपि हि तन्निमित्तग्रहणेऽत्र प्राप्नोति द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्प्यं द्विशूर्पेण क्रीतं द्विशौर्पिकं त्रिशौर्पिकं। अथ विज्ञायते स निमित्तमस्यासोयं तन्निमित्तः तन्निमित्तादिति न दोषो भवति यथा न दोषस्तथास्तु। स निमित्तमस्यासोयं तन्निमित्तस्तन्निमित्तादिति विज्ञायते। कुत एतत्। यदयमाह। अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपीति। तत्र हि तन्निमित्तग्रहणं कर्त्तव्यं। न कर्त्तव्यं। द्विगोरिति। नैषा पंचमी। का तर्हि। संबंधषष्ठी। द्विगोस्तद्धितस्य लुग्भवति। द्विगोर्यस्तद्धितः किं च द्विगोस्तद्धितः निमित्तं यस्मिन्द्विगौ स तद्वृत्तिकस्मिंश्चैतद्भवति। प्रत्यये। इदं तर्हि वक्तव्यं अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपीति। एतच्च न वक्तव्यं। इहास्माभिर्द्वौ शब्दौ साध्यौ द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्प्याक्रीतं द्विशूर्पमिति तत्र द्वयोः शब्दयोः समानार्थयोः एकेन विग्रहं करिष्यते अपरस्मादुत्पत्तिर्भविष्यति। अथवा विकल्पायेन तघ्या। अथवेमं समिति विगृह्य अविकृतशब्दादुत्पत्तिर्भविष्यति। आविकमिति। एवमिहापि द्वाभ्यां (शूर्पाभ्यां) क्रीतमिति विगृह्य द्विशूर्पमिति भविष्यति द्विशूर्प्या क्रीतमिति विग्रहवाक्यमेव भविष्यति। असंज्ञायामिति किमर्थं।

चेत्। प्रत्ययांतसंज्ञे ति पांचलोहितिकं पांचकलापिकं प्राह्वेव परिमाणविशेषस्य संज्ञे इति लुङ् न भवति। वार्त्तिककारस्तु द्विगुविशेषणमसंज्ञाग्रहणं सन्निधानादवगम्य प्रत्याचष्टे॥

=विषयत्वं सप्तम्यर्थः। संज्ञाविषयो द्विगुर्न चेदित्यर्थः।९=

भा०कै०५ तन्निमित्तत्वादिति तस्याः संज्ञा यास्तो पए उनिमित्तमिति स्यर्थः पंचलोहितपंचकलायशब्दौ हि शुक्लतत्तद्धितलुकावेव संज्ञेन तो नार्थेः प्रतिषेधे नेत्यर्थः। पंचलोहितीति। समा
१४ हारद्विगुसंज्ञामन्यते तत एव तत्लोपनिमित्तैव संज्ञा। अत्रापीति। अन्यविकल्पाये नवाक्यविषय एव समाहारद्विगुरित्यर्थः॥ अध्यर्धग्रहणं चेति बहुगणादिसूत्र इदमु
क्तं न च संख्याकार्याभावत्वात्पनमध्यर्धग्रहणस्येह प्रयोजनं कल्पसमासाभावप्रसंगात्। तस्मान्न च संज्ञा किं कृमेव कृत्ये यं तस्मिं च सति इहाध्यर्धग्रहणमनर्थकं हि

=नतावितिः एवं च तन्निमित्तत्वादेव तत्स्यन्तलुक् एते ते तदुक्तं पंचलोहित्यः परिमाणमस्येत्यर्थे पंचलोहितइत्येव जयति पंचलोहितेनक्रीतइत्याद्यर्थे तु यां चलोहितिकइति। २=अर्थविशेषे तिः असंज्ञायामिसम्पृक्तनतावाद्यर १ =इन्नादिः =ह समाहारद्व

तन्निमित्तत्वाल्लोपस्य संज्ञाप्रतिषेधस्यानर्थक्यः किं कारणं तन्निमित्तत्वाल्लोपस्य नो तरेण तद्धितं तद्धितस्य च लुकं द्विगुः संज्ञास्ति यस्तस्मादुत्पद्यते
नौ तन्निमित्तः स्यात्। एवं तर्हीदं स्यात् संचानां लोहितानां समाहारः पंचलोहिती पंचलोहितैः क्रीतमिति। अत्रापि पंचलोहितमित्येवं भवितव्यं क
र्थं उक्तं स्येत तत्। अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपीति उक्तं संख्यालेप्रयोजनं तस्मादिहाध्यर्धग्रहणानर्थक्यं। उक्तं संख्याले अध्यर्द्ध
ग्रहणस्य प्रयोजनं किमुक्तं। अध्यर्द्धग्रहणं च समासकन्विध्यर्थं लुकि चाग्रहणमिति तस्मादिहाध्यर्द्धग्रहणानर्थक्यं॥ तस्मादिहाध्यर्द्ध
ग्रहणमनर्थकं द्विगोरिसेवलुकसिद्धः॥ विभाषाकार्षापणसहस्राभ्यां सुवर्णशतमानयो रूपसंख्यानं। कार्षापणसहस्राभ्यां सुवर्णशतमानयो रूपसं
ख्यानं कर्तव्यं। अध्यर्द्धसुवर्णं अध्यर्द्धसौवर्णिकं॥ अध्यर्द्धमानं अध्यर्द्धशातमानं द्विशतमानं द्विशातमानम्॥ ॥ ॥

गुत्वाल्लुकःसिद्धत्वात्। विभाषाकर्षापणाः अध्यर्द्धसुवर्णमिति। अध्यर्द्धेन सुवर्णेन क्रीतमिति द्विगोष्ठन्तेठञो लुक्। अलुक्पक्षे परिमाणान्तस्येत्युत्तरपदवृद्धिः उच्चात्वं राम०
स्यापि वृद्धौ शाणप्रतिषेधात् ग्रहणात् द्विशतमानमिति शतमानादिसूत्रेणाण॥ ॥ ॥ ॥ १४

=तेन चस्यान्वयो लभ्यत इति एतद्द्वैयोग्यमिति सामानाधिकरण्योपपत्तिः। तद्धितप्रयोगस्तु प्रियत द्धिताद्यक्षिणलाद्वा इत्यायेन। २

द्विगुः। द्व्योर्योगयोरिति। तद्धितार्थे द्विगौ कृते वक्ष्यमाणोत्पत्तिरनाद्यं द्विगोर्लुगनपत्ये इति लुक्। अथ द्विगुरन्येषामाख्यातम नामत्वात्। एवं तु कृते द्वैयोग्यशब्दे न चाधाराधेय भाव उच्यते। समासकृत्तद्धितेषु सम्बन्धाभिधानमिति वचनात्। खार्या। केवलायाश्चेति। अध्यर्द्धपूर्वद्विगोरित्यधिकारात् केवलायाः न प्राप्नोतीति वचनं शाणाच्छत

=द्वित्रिभ्यामित्येतदधुच्यते। १=

द्वित्रिपूर्वान्निष्कात्॥ बिस्ताच्च। द्वित्रिभ्यां द्वैयोग्यं द्वित्रिभ्यां य उच्यते तद्वैयोग्यमिति दृष्टं स्यात्। किमिदं द्वैयोग्यमिति। द्व्योर्योगयोर्मध्यं द्वियोगं द्वियोगस्य भावः द्वैयोग्यमिति द्वैध्यं विजानीयात्। अविशेषेणोत उत्तरं द्वित्रिभ्यामिति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे द्वित्रिभ्यां द्वैयोग्यमिति। तत्र च बहु ग्रहणं कर्त्तव्यं बहुनिष्कं बहुनैष्किकं। बहुबिस्तं बहुबैस्तिकं। खार्या ईकन्। खार्या ईकन् केवलायाश्च। खार्या ईकन् केवलायाश्चेति वक्त व्यं। खारीकं। काकिण्याश्चोपसंख्यानं। काकिण्याश्चोपसंख्यानं कर्त्तव्यं। अध्यर्द्धकाकिणीकं द्विकाकिणीकं केवलायाश्च केवलायाश्चेति वक्त व्यं। काकिणीकं। शाणाद्वा। शतशाणाभ्यां वेति वक्तव्यं। अध्यर्द्धशतं अध्यर्द्धशत्यं पंचशतं पंचशत्यं। अध्यर्द्धशाणं। अध्यर्द्धशाण्यं पं चशाणं पंचशाण्यं। द्वित्रिपूर्वादण् चेति वक्तव्यं। द्विशाणं त्रिशाणं [redacted]। द्वैशाणं त्रैशाणं द्विशाण्यं त्रिशाण्यं तेन क्रीतं तेन क्रीतमिति करणात् तेन क्रीतमित्यत्र करणादिति वक्तव्यं। इह मा भूत् देवदत्तेन क्रीतं यज्ञदत्तेन क्रीतमिति। अकर्त्तृकोतात्। अकर्त्तृकोतादिति वक्तव्ये इ

॥ इह मा भूद्देवदत्तेन पाणिना क्रीतमिति॥ =कर्त्तव्यवयवादिसर्गः। १=   ॥   ॥

णा
शाणाभ्यामिति शतान्तात् पूर्वेणानिसेयति प्राप्ते विकल्पार्थं वचनं यदभावपक्षे कनो लुक् द्वित्रिपूर्वादण् चेति सूत्रे घ्ननार्थः पाठ इति वार्त्तिकारंभः ॥ तेन क्रीतम् ॥

॥   ॥   ॥   ॥७॥   ॥

संख्यैकवचनादिति। समाहारे द्वन्द्वः। परिमाणस्येति परिमाणस्य या संख्या तस्याः यद्वाचकं द्योतकं वैकवचनं तदन्तादिति वक्तव्यमिति वचनात् मुद्गादीनां माषादीनां चाप्रति
षेधः। अनभिधानादिति। यतो संख्याविशेषानवगमात् परिमाणशब्देभ्यो द्विवचनबहुवचनान्तेभ्यः प्रत्ययाभावः। एकत्वसंख्यायुक्ते चार्थे तेषां स्वभावतो वा सैकवच
नान्तेभ्य एव प्रत्ययः। माषस्य सः शब्दानुप्रायामपि विभक्तौ स्वप्रवृत्तिनिमित्तभूतां संख्यामवगमयन्तीति तेभ्यः प्रत्ययो भवत्येव। एकया च मुद्गादिभिन्नया क्रयासंभवा

=अयमप्येकवचनान्तादिरस्यापकर्षः।२= =अपवादः।१=

संख्यैकवचनात् द्विगोश्चोपसंख्यानं संख्याया इति वक्तव्यं। इहापि यथा स्यात् पंचभिः क्रीतं पंचकं। किं पुनः कारणं न सिध्यति। एकवचनां
तादिति वक्ष्यति तेनास्यायं पुरस्तादपकर्षः। एकवचनात्। एकवचनान्तादिति वक्तव्यमिह मा भूत् शूर्पाभ्यां क्रीतं शूर्पैः क्रीतमिति। द्विगोश्चेति व
क्तव्यं। इहापि यथा स्यात्। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पं त्रिशूर्पमिति। यद्येकवचनान्तादित्युच्यते। मुद्गैः क्रीतं मौद्गिकं माषैः क्रीतं माषिक
मिति न सिध्यति। परिमाणस्य संख्याया यदेकवचनं तदन्तादिति वक्तव्यं। तत्र त्वेकवचनान्तादिति वक्तव्यं तस्मिंश्च क्रियमाणे बहुवक्त
व्यं भवति। न वक्तव्यं॥ कस्मान्न भवति शूर्पाभ्यां क्रीतं शूर्पैः क्रीतमिति। उक्तं वा किमुक्तं। अनभिधानादिति यद्येवं कर्णादेकत्रैकान्ता
दिरपि न वक्तव्यं। कर्त्रैकान्ताद्वा कस्मान्न भवति। अनभिधानात्। तस्य निमित्तं। संयोगोत्पातयोः को विशेषः। संयोगो नाम स भवति इदं
कर्त्रैः१ कृत्वा इदमवाप्यत इति उत्पातो नाम स भवति॥ ॥ ॥

तद्बहुवचनान्तादेव प्रत्ययः यदा तु जातिशब्दत्वं मुद्गादीनामभ्युपेयते तदैकवचनान्तेभ्योपि प्रत्ययः। ननु यत्निष्केण क्रीतं तस्य निष्को वस्नो भवतीति सोस्यांशवस्नभृतय
इतीयनेन प्रत्ययासिद्धा इति नार्थोनेन योगेन। अत्रोच्यते। कुप्यस्य प्रशतं मूल्यं न भवति अपि च तेन क्रीतं कार्यवशात् तदर्थमिदम्। तस्य संयोगोत्पातयोरिति। कोऽनयोः शब्द
योरर्थ इति प्रश्नः। न तत्कार्यत्वं मन्यमानस्य प्रश्नः को सौ विशेषः येन संयोगोत्पातौ प्रतिपद्यामहे। इदं कृत्वेति। यथा कामेष्ट्यादियोगैः पुत्रादयो वा अंगेनेतत्रसंयुज्यते फल

कश्चिच्छमनं प्रतीयते २

याद्दच्छिक इति। अन्तर्भावितोऽयन्न ततः भेद इति। वस्नादेः छेद इति। उपानद्वारे भविनः शुभस्याशुभस्य वा सूचकोऽर्थ उत्पात इत्यर्थः तस्य च निमित्तत्वं [redacted] फलविशेषविषयबुभु-
त्सितिहेतुत्वात् न तु फलं प्रति कारणत्वात् वातिकमिति शमनकोपने एवात्र प्रत्ययार्थः। न तु निमित्तं ठगत्र प्रत्ययः प्रकरणादिव शाट्ठ्यं कश्चित्कोपनं॥ गोद्वया। ब्रह्मवर्चस-
इति ब्रह्मणो वर्चो ब्रह्मवर्चसं रत्नस्वाध्यायसंपद् उच्यते। ब्रह्महस्तिभ्यां वर्चस इत्यच्समासांतः। तदस्मिन्नयत्र नदी। द्वाणौ शुल्कादिरीयते तत्र प्रत्ययो विधीयमान

पद्दच्छिको भेदो वाच्छेदो वा पद्यं वा पर्णं वा। तस्य निमित्तं प्रकरणे वातपित्तश्लेष्मभ्यः शमन [redacted] कोपनयोरुपसंख्यानं। तस्य निमित्तं प्रकरणे वा-
तपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानं कर्तव्यं। वातस्य शमनं कोपनं वा। वातिकं पैत्तिकं श्लैष्मिकं। सन्निपाताच्च। सन्निपाताच्चेति वक्त-
व्यं सान्निपातिकं। गोद्व्यचोसंख्यापरिमाणाश्वादेर्यत्॥ यत्प्रकरणे ब्रह्मवर्चसाच्चेत्प्रकरणे ब्रह्मवर्चसाच्चोपसंख्यानं कर्तव्यं ब्रह्मवर्चसस्य नि-
मित्तं संयोगः ब्रह्मवर्चस्यः उत्पातो वा। तदस्मिन्वृद्ध्यायलाभ तदस्मिन्दीयते ऽस्माइति च। तदस्मिन्दीयते स्मा इति चेति वक्तव्यं। पंचकहृद्विवो ऽद्यायो
वा लाभो वा शुल्को वा उपदा वा दीयते ऽस्मै। पंचकः सप्तकः ऽष्टकः नवकः दशकः तत्राहि उपसंख्यानं कर्तव्यं न कर्तव्यं। पद्विधस्मिन्दीयते त-
ऽस्मिन्नपि तद्दीयते तत्र तदस्मिन्दीयत इत्येव सिद्धं प्रकरणाद्धो ठ न ठ प्रकरणे ऽन्नेना उपसंख्यानं कर्तव्यं॥ ॥

संप्रदानेन प्राप्नोतीत्याह तदस्मिन्निति तस्मिन्नपीति। संप्रदानमेवदानक्रियापेक्षयाधिकरणत्वेन विवक्षते। यथा समम ब्राह्मणे दानमिति। प्रकरणाच्छन्नतादिति
यथा गोस्त्रियोरिसे ऽन्तरा हेन स्त्र्यधिकारविहितानां टावादीनां ग्रहणं एवमिहापि प्रकरणाधिकारविहिताए वठ्ठादयो गृह्यन्ते रन्निति वचनं॥ ॥ ॥

द्वितीयिक इति द्वयोः पूरणो भाग इति द्वेस्तीयस्तदंतात्पूरणात्भागेतीयादन्यतिस्वार्थे अन्प्रत्ययः ततो द्वितीयो वृद्ध्यादिः स्मिन्नीयत इतिठन्प्रत्ययः पर्यवपन्नमिति व्यव
हितमित्यर्थः। पूरणं नामेति। अर्थग्रहणमिह ननु पूरणाधिकारविहितप्रत्ययग्रहणमिति भावः स्वार्थ इति स्वस्याः प्रकृतेरर्थः साहि प्रत्ययस्यात्मीयात दर्थेचान्विधीय
मानः पूरणाभिधायित्वात्पूरणाप्रपदेश मासादपतीत्यर्थः। संभद्रोणादिति। द्रोणप्रमितेत्रीह्यादौ वर्तमानात् द्रोणशब्दात् प्रत्ययस्तस्यैव पाकसंभवात्॥

द्वितीयिकः ततीयिकः किंपुनः कारणं न सिध्यति। पूरणादित्युच्यते नचैतत्पूरणं तदर्थे नैतत्पर्यवपन्नं पूरणं नामार्थः। तमर्थे माहतीय
शब्दं पूरणं सो सौ भवति पूरणान्तात् स्वार्थे भागे अन्सोपि पूरणं भवत्येवासंभवत्यव्द्दर। ति। तत्प्रचुरी ति द्रोणादाचेति वक्तव्यं। द्रोणंप
चतिद्रौणी द्रौणिकी। कुलिजाल्लुक्। खञ्ग्रहणानर्थकं पूर्वस्मिन्नविकभावात्॥ कुलिजाल्लुकौ खञ्च वक्तव्यं। नार्थो लुक्खग्रहणे
न। किंकारणं। पूर्वस्मिन्नत्रिकभावात् पूर्वस्मिन्योगे सर्वएव त्रिको निर्दिश्यते ष्ठन्ठञ्कीष्ठाठकिकीष्ठाठकाना॥ ॥

×कुलिजाद्येति सिद्धेलुक्र×

कुलि कुलिजाच्चेति सिद्ध इति। कुलिजाच्चेत्येव सूत्रमस्तु तत्र द्विगोष्ठंश्चेत्यनुवर्त्तते खोन्यतरस्यामिति चनत्रस्य नखाभ्यांमुक्ते पक्षे ठन्नतस्माद्द्वयं सिद्धं न चैवं सति लु
क् एवं रूपत्रयं सिद्धं न चठंत्रं पक्षे लुगभावेन चतुर्थरूपमिष्यत इति। लुक्खग्रहणं वार्त्तिककृता प्रत्याख्यातं॥ [redacted] ॥ ॥

=अत्रसन्नेः न्यतरस्यां ग्रहणानुवर्त्तते इति भावः।१

तदस्य। संज्ञायां स्वार्थे इति। इहादशान्प्रसंख्या संख्येये वर्त्तते न तु संख्यानमात्रे ततः परा तु संख्या संख्याने संख्येये च तत्रय एव शकुनयः पंचत्वसंख्यायुक्ताः पंचशब्दस्यवा
च्याः तएव पंचकशब्दस्यापि तत्र च परिमाणं परिमाणिभावाभावात्स्वार्थे एवमसयोवक्तव्यः यदा तु इत्तिविषये संख्यामात्रवृत्तित्वे पंचादीनामाश्रीयते यथा द्वेकयोरि
तिस्तत्र कारेणाद्वित्वैकत्वे द्व्येकशब्दवाच्ये आश्रितनिर्देशः कृतः संख्येयार्थत्वे हि द्व्येकेष्विति स्यात्। तदा परिमाणं जीवितपरिमाणो चेति पूर्वोपेक्षे समुच्चयः संघादिषु

×परिमाणिभावाश्रयेणापि शकाः प्रत्ययउसादमितुं×

=संख्यायाअतिशदंताया ति [redacted] संज्ञायांकनो। मात्रे आर्तदगेषु चेति संख्यापर्युदासात्कस्यायामोमावनेडन्दः॥ अत्रापिपूर्ववत्कोकोदमातोमाग्नेडन्दः संतपर्युदासेसंख्यापर्युदासेचमात्रैः संख्यापूर्वपदानांतपंतादिधितिनिवचनात्जपोनमसंगात्॥५॥

तदस्य परिमाणं संख्यायाः संज्ञासंघसूत्राध्ययनेषु। संज्ञायां स्वार्थे। संज्ञायां स्वार्थे प्रत्ययउसाघः। पंचैव पंचकाः शकुनयः त्रिकाः शालंकाय
नाः सप्तकाश्च रूलवृक्षाः। ततः परिमाणिनि। ततः परः प्रत्ययः परिमाणिनीतिवक्तव्यं। पंचकः संघः दशकः संघः जीवितपरिमाणे चोपसंख्या
नं जीवितपरिमाणे चोपसंख्यानं कर्त्तव्यं षष्टिर्जीवितपरिमाणमस्य षाष्टिकः साप्ततिकः जीवितपरिमाणे चेत्सनर्थकं वचनं कालादितिसिद्धत्वा
त्। जीवितपरिमाणे चेत्यनर्थकं वचनं किंकारणं कालादितिसिद्धत्वात् कालादित्येव सिद्धं इहयस्य षष्टिर्जीवितपरिमाणं षष्टिमसौ भूतोभ
वति। तत्र तमधीष्टो भृतो भूतो भावीत्येव सिद्धं अवश्यं चैतदेवं विज्ञेयं इह वचने हि लुक्प्रसंगः। इह हि क्रियमाणे लुक्प्रसज्येत द्वैषाष्टिकः अने
नसति लुग्भवतितेन सतिकस्मान्न भवति आर्हादित्युच्यते। न सिध्यति किंकारणं न हीमे कालशब्दाः किं तर्हि संख्याशब्दाः [redacted] इमेपि कालशब्दाः कथं॥

प्रत्ययो विधीयमानो यत्र प्राप्नोतीति वचनात् द्विषाष्टिक इति संख्यायाः संवत्सरसंख्यस्येत्युत्तरपदवृद्धिः। आर्हादिति। अर्द्धोरवेत्यत्राहादित्यनुवर्त्तनादाहीयस्तुलकाभा
वः। तमधीष्ट इत्यनेन प्रत्ययो होत् परइति तस्य लुगभावः न हीम इति मासादय एव कालशब्दा न तु निमित्तांतरेणकालेप्रयोगमात्रेणेति भावः॥ ॥

पा० कै० ५
१७

संख्या संख्येय इति। कालेसंख्येये वर्त्तमानस्य संख्यावाचिनः कालाभिधायित्वमुपपन्नमितिभावः। वार्षशतिक इति। संख्यायां प्रत्ययो विधीयमान स्तदंतान्न प्राप्नोतिसंख्या पूर्वपदानामेव प्राग्वतेस्तदंतविधिरिष्यते॥ खारशताद्यर्थमिति। खारिशब्दोऽकारांतो वा निर्दिष्टः कारवचनात्साधुः तदस्य परिमाणमिति योग विभागः कर्त्तव्य इत्युक्तं भवति। अनभिधानादिति। नहिरमणीयादयो वृत्ति विषये कालेवर्त्तंते वृष्टास्यस्त वर्त्तौसंख्येये वृत्तं वत्सरे खुसभाव तोवर्त्ते

संख्यासंख्येयेवर्त्तते यदितर्हियोयः कालेवर्त्तते सकालशब्दः रमणीयादिष्वतिप्रसंगो भवति। रमणीयं कालं भूतः। शोभनंकालं भूतः अयमत मेतत्कालेदृष्टः शब्दः कालंयोनव्यभिचरतीति। नरमणीयादिषु अतिप्रसंगोभवति जीवितपरिमाणेतु उपसंख्यानंकर्त्तव्यं इहच उपसंख्यानं कर्त्तव्यं वार्षशतिको वार्षसहस्रिक इति। किंपुनः कारणं न सिध्यति। नहिवर्षशतशब्दः संख्या किंतर्हि संख्येये वर्त्तते वर्षशत शब्दः एवंतर्हि अन्येभ्योऽपि दृश्यत इतिवक्ष्यति किंप्रयोजनं। खारशताद्यर्थं। खारशतिकोराशिः खारसहस्रिकोराशिः॥ अयं तर्हि दोषः। इहवचने हि लुक्प्रसंगइति। नब्रूमोयत्नक्रियमाणे दोषः तत्रकर्त्तव्यमिति किं तर्हियत्नक्रियमाणेनदोषः तत्रकर्त्तव्यं। किंच क्रियमाणेनदोषः। शमाहोत। नतर्हि उपसंख्यानं कर्त्तव्यं। नकर्त्तव्यं कालादिस्ववृत्तिदुं ननुचोक्तं नेमेकालशब्दाः किं तर्हिसंख्याशब्दाइति ननुचोक्तं इमेपिकालशब्दाः कथं संख्यासंख्येयेवर्त्तते। ननुचोक्तं। यदितर्हियोयः शब्दः कालेवर्त्तते स कालशब्दः रमणीयादिष्वतिप्रसंगो भवतीति। उक्तं वा किमुक्तं अनभिधानादिति। अनभिधानाद्रमणीयादिषु सप्तिनेभविष्यति स्तोमेडविधिः पंचदशाद्यर्थः स्तोमेडोविधेयः। किंप्रयोजनं पंचदशः स्तोमः सप्तदशः स्तोमइति॥ ॥इतिश्रीभगवत्पतंजलिविरचितेव्याकरणमहाभाष्ये पंचमाध्यायस्य प्रथमेपादे प्रथममाह्निकं॥

तइतियुक्तं तेषां कालवाचित्वं लोकेच संवत्सरसंख्ययाजीवितंप्रायेणपरिच्छिद्यत इति संवत्सरवृत्तित्वंषष्टयारीनामुच्यते स्तोमेडविधिरिति डित्करणंविंशंस्तोमइत्यादौ तिविलोपार्थं पंचदशइत्यत्र तुनस्तद्धितइतिटिलोपस्सिध्यतिस्तोमोमंत्रसमूहः॥ ॥इत्युपाध्यायजैय्यटपुत्रकैयटकृते भाष्यप्रदीपे पंचमस्यप्रथमपादेप्रथममाह्निकं॥ एम
१७

मे२

त्रिंशः स्तोमः २

=बीजांतरमप्याह-वक्ष्यमाणे किं तद्धविंशत्यादिविषयमेवेतिभावः।२= ननु प्रकृतिप्रत्ययातिरिक्तनिपातभावात्केनशास्त्रेणमत आह- महत्वचैत्रेति-२= आलक्ष्यपंक्तिरित्यादौ-१

पंक्तिरूमेविंशत्यादय इति। सूत्रे पठितानां प्रत्ययस्त्वादिसमापरामर्शः। पंक्तिशब्दः छन्दोविशेषसंज्ञित्वे दशविशेषेच रूढो नैवावयवार्थानुसारेण प्रवर्तत इति तत्सारिसागेन विंशत्यादय एव विचार्यते। वेत्स्यमाणवार्त्तिकावतारणार्थं चायं भाष्य उपक्षेपः। सप्रकृतिका इति प्रकृतिप्रत्ययप्रकरणउच्चारणादिति भावः। सह शब्दो विद्यमानार्थः न तुल्ययोगार्थः तेन विद्यमानप्रकृतिप्रत्यया इत्यर्थः। निपात्यन्त इति। प्रकृतिलमेषां कस्मान्न विज्ञायते चेत्तस्मात् प्रत्ययस्यचानुपादानात् निष्पन्नस्य च प्रकृतित्वाभावात्। प्रत्ययत्वं तर्हि कस्मादेषां न भवति लोके केवलानां प्रयोगदर्शनात् शतादिवन्न त्रोक्वशते विंशत्यादिस्य इति शास्त्रे च केवलानामुच्चारणात्॥ विधिनिपातन्न

सप्रकृतिकाः१

पंक्तिविंशति॥ इमे विंशत्यादयः सप्रत्ययकाश्च निपात्यन्ते तत्र न ज्ञायते का प्रकृतिः कः प्रत्य
यः कः प्रत्ययार्थ इति तत्र वक्तव्यमियं प्रकृतिरयं प्रत्ययः अयं प्रत्ययार्थ इति इमे ब्रूमः॥

=ननु प्रकृताबुक्तायां तदर्थेवगते विशिष्टः प्रत्ययार्थ इति ज्ञातुं शक्यत एवेति किं तत्प्रश्नेनेत्यत आह- लोकेइति-२=

=प्रकृतिसामान्यस्य प्रकरणादेवज्ञातत्वात्-१= रिति-प्रकृति-१

योऽयं पंभेदो यत्रावयवा निर्दिश्यन्ते समुदायो नुमीयते सविधियंत्रतु समुदायः श्रूयते अवयवा अनुमीयन्ते तन्निपातनं। का प्रकृतिं प्रत्ययविशेषविषयः प्रश्नः प्रकृत्य र्थेनन इच्छति प्रकृतौ विज्ञातायां तदर्थस्यापि विज्ञानात् का। कः प्रत्ययार्थ इति लोके विंशत्यादीनां संख्यायां संख्येये च प्रयोगो दृश्यते तत्र लौकिकार्थानुगुणं कः प्रत्ययार्थे माश्रित्य साधुत्वमेषामन्वाख्यानं क्रियत इत्यर्थः इमे ब्रूम इति। वचनक्रियायामाभिमुख्यं प्रतिपादयितुं प्रश्नस्य सर्वनाम्नोपादानं वचनमात्रं चेह विवक्षितं न तु
१ कर्त्रभिप्रायं क्रियाफलं इत्यात्मनेपदं न कृतं॥ ॥ ॥ ॥

=अभिवचनस्य सुखफलत्वाद्धं तत्राभिमुख्यं एवावस्थितान्त्यमध्यकालक्षणत्वाच्चित्रिकाद्याः इति तात्पर्यार्थः।२=

भा०कै०५ द्विदशत्वादिति। दशद्गुर्णलक्षणा संख्येयवाचिन इत्यर्थः॥ समुदाये च निपातः समानेनांनतीयक्रमवयवानां निपातनमित्यभिप्रायेण शतिच् प्रत्ययो निपात्यत इत्युच्यते॥ स्वार्थे इति।
१८ प्रत्ययस्य स्वात्मीया प्रकृतिस्तस्या अर्थः। अथवायं प्रकृतेरर्थः स एव प्रत्ययानां स्वार्थे पितृधनमिव पुत्रस्य तत्र वार्थप्रत्ययस्तत्र अनिर्दिष्टार्थप्रत्ययस्पोसन्नेर्थाप्यत्वात्
समासवचनानुपपत्तिरिति। इष्टयोः समासवचनयोरनुपपत्तिरित्ययमर्थोऽभिमतः न हि समासमासत्वं वचनमात्रं वा न सिध्यति॥ विंशतिगवमिति। विंशतिशब्देन द्व
योर्दशतोरभिधानं न तु दशत्संबंधिनां द्रव्याणां तत्र च दशदपेक्षया गवां व्यतिरेकोपजननात् षष्ठ्यभावे गवां विंशतिरिति ततः समानाधिकरणपदनिबंधनद्विगु

द्विदशद्वादयं दशद्दर्थोऽभिधायिनः स्वार्थे शतिच्प्रत्ययो निपात्यते विन्भावश्च द्वौ दशतौ विंशतिः। विंशत्यादयो दशदर्थे चेत्समासवचनानु
पपत्तिः विंशत्यादयोर्दशदर्थे चेत् समासो नोपपद्यते विंशतिगवमिति किं कारणं द्रव्यमनभिहितं तत्र सा न अभिहितत्वात् षष्ठी प्राप्नोति। षष्ठ्यं
ते च समासे पूर्वं निपतति। तत्र गो विंशतिरिति प्राप्नोति। न चैवं भवितव्यं। भवितव्यं च विंशतिगवं तु न सिध्यति। इह च त्रिंशत्पूली च
त्वारिंशत्पूली समानाधिकरणलक्षणः समासो न प्राप्नोति। वचनं च विधेयं। विंशतिः द्विलादृश्यतोऽद्वयोर्द्विवचनं प्राप्नोति। एवं तर्हि प
रिमाणिनि विंशत्यादयो भविष्यंति॥ ॥ ॥

समासाप्रसंगः षष्ठ्यंतं चेति। उपसर्जनं पूर्वमिति लक्षणेन। गुणेन षष्ठी न समस्यत इति प्रतिषेधः संख्यायां न भवति शतसहस्रांतात्त्व निष्कादिति प्रत्ययविधानात्
ज्ञापकात् कोशशतयोजनशतयोरिति वार्त्तिककारवचनाच्च। द्विवचनं प्राप्नोतीति। स्वार्थिकाः प्रकृतिलिंगमेवके चिदिति वचनेनैतेन तु संख्यामपि संख्यांतरयुक्तसं
संख्यांतरविरोधात् लिंगानां तु विरोधाभावः स्त्रीसूत्रे प्रतिपादितः। एवं तर्हीति तदस्य परिमाणमित्यधिकारात्॥ परिमाणे या धेसंख्या अस्येति परिमाणिनि प्रत्य एम०
यं परिमाणी च द्विविधः द्रव्यसंघातो भिन्नानि वा द्रव्याणि तत्र संघस्यैकत्वात् विंशतिरित्येकवचनं सिद्ध्यति द्रव्याणां परिमाणित्वे विंशतिगवं त्रिंशत्पूलीति समाना १८

=द्वे दशतौ परिमाणमस्येत्यधिकापिति वा विग्रहः। १८=

परिमाणिनि चेरिति। द्वौ पातौ परिमाणं यस्य संघस्य संघो विंशतिरित्यभिधीयते। तत्र विंशतिः परिमाणं यस्य संघस्येति संघो न रस्य परिमाणिनो संभवाद्विंशकः संघ इति सि
द्धये विंशतित्रिंशद्भ्यां ड्वुन् संज्ञायामिति ड्वुन् प्रत्ययः स्वार्थे वक्तव्यः ननु यदा द्रव्याणि परिमाणानि विंशतिशब्दाभिधेयानि तदा संघे परिमाणिनि प्रत्ययस्सि
द्धस्तेन [redacted] व विंशतिर्गावः परिमाणमस्या विंशकः संघ इति एवं तर्हि विंशतिशब्देन संघस्याभिधानं प्राप्नोति न चेष्यते विंशतिर्गो संघ इति तस्मा
=किंतु विंशको गो संघ इत्येवेष्यते इति भावः।३=

परिमाणिनि चेत्पुनः स्वार्थे प्रत्ययविधानं परिमाणिनि चेत्पुनः स्वार्थे प्रत्ययो विधेयः विंशकः
संघः॥ षष्ठीवचनविधिश्चा षष्ठी च विधेया गवां विंशतिः द्रव्यमभिहितं तत्स्याभिहितत्वात्षष्ठी
न प्राप्नोति एकवचनं च विधेयं विंशतिर्गावः गोभिः सामानाधिकरण्याद्बहुवद्बहुवचनं
प्राप्नोति॥ ॥ ॥

=सर्वथेत्यर्थः।२= =विंशतिर्गो संघ इति ड्वुन् मन्तरेणेत्यर्थः।१= =केमिस्त्रियामित्यादावित्युक्तं तस्यैव प्रयोगो यथास्यादित्येवमर्थः।१=

घटासंघे परिमाणिनि विंशत्यादयो निपात्यंते तदा तत्र तेषां केवलानां प्रयोगो मा भूदिति पुनः स्वार्थे नित्यं प्रत्ययो विधेयः। षष्ठीवचनविधिश्चेति। संघे परिमाणिनि विंश
त्यादीनां केवलानां नित्यं प्रयोगो नेष्यते भिन्नेषु तु द्रव्येषु परिमाणिषु प्रत्ययोत्पत्त्या वाश्रीयमाणायां विंशतिशब्देन द्रव्याणामभिधानात् व्यतिरेकाभावात् गवां
विंशतिरिति षष्ठी न प्राप्नोति द्रव्यसामानाधिकरण्यात् बहुवचनप्रसंगश्च तदेवं युक्तिपक्षे दूषणान्यभिधायायुक्तिपक्षं निर्दोषमाश्रित्यारंभं प्रत्याख्यातुमाह॥

भा०कै०५
१९

अनारंभो वेति। वाशब्दस्तर्ह्यर्थे सहस्रादिवदमुसन्ना एवंविंशत्यादयोप्यर्थवद्धातुरिति लब्धप्रातिपदिकसंज्ञा अर्थवत्त्वेनानुज्ञातसाधिमानं संख्यायां संख्येये
च प्रयोगभेदेनाक्षादिवद्[redacted]नेकार्थतया स्वभावतो वर्तमाना रूढिशब्दत्वाच्च नियतलिंगसंख्याः यथा आपो दारा इति भावः इदानीं भाष्यकार आरंभं सम
र्थयमान आह यथेति। अयमत्रार्थः॥ अक्षादयः परस्परानन्विताऽनेकार्थाभिधायिनो भिन्ना अक्षजातिषु रूढिशब्दा एव न तु योगिकाः विंशत्यादयः सहस्राद
यश्च मुसलादिवत् गुणिनि योगिका एव न हि संख्यानिरपेक्षाः संख्येयविशेषमेते प्रत्याययन्तीत्ययं नैषां रूढिशब्दत्वमुच्यते। अत्रापि संदेह इति। कए

अनारंभो वा प्रातिपदिकविज्ञानाद्यथा सहस्रादिषु अनारंभो वा पुनर्विंशत्यादीनां न्याय्यः कथमिति धातिप्रातिपदिकविज्ञानं विं
शत्यादयः अमुसन्नानि प्रातिपदिकानि यथा सहस्रादिषु। तद्यथा सहस्रमयुतमर्बुदमिति। न चानुगमः क्रियते भवति चा
भिधानं। यथा सहस्रादिष्विति उच्यते। अथ सहस्रेपि कथं भवितव्यं सहस्रं गावः सहस्रं गावः सहस्रं गावो गोसहस्रमिति। यावत्त्रापि [redacted]
संदेहः नास्त्याकृतेर्न्याय्य त्वानुगमः क्रियते न न्वनुचोक्तं विंशत्यादयो द्दश्यर्थे चेत्समासवचनानुपपत्तिः परिमाणिनि चेत्पुनः स्वार्थे प्र
त्ययविधानं षष्ठीवचनविधिश्चेतिनैष दोषः॥ समुदाये विंशत्यादयो भवन्तीति॥ किं वक्तव्यमेतत्। न हि कथमनुच्यमानं गंस्यते॥

षांमुख्योर्थः को वा सोयमिति संबंधारोपचारिक इति संदेहः नास्त्येति। अननुगमो हि दोषाय अनवस्थानं स्यात्सर्वशब्दानुगमो न त्वननुगम एव सम्प्रज्ञापरा
धाद शब्दार्थविशेषनिश्चत्वाद्दोषत्वेनोद्भावनीय इत्यर्थः॥ समुदाय इति अस्येति प्रत्ययार्थस्यानुवर्तनात्समुदायः परिमाणी प्रत्ययार्थे त्वे नाश्रीयते
न तु भिन्नानि द्रव्याणीत्यर्थः॥ किं वक्तव्यमिति। अस्यस्यानुवर्तने नास्य परिमाणे प्रत्ययो लभ्यते न तु तद्विशेष इति मत्वा प्रश्नः॥ ॥ ॥ रामः०
१९

= ननु चोक्तमिति। अन्यथा विंशतिर्गोसंघ इति प्राप्नोति विंशकः इति चेत्यनेन इति भावः। द्रव्यसंघयोरिति। दशत्वादेरपि संख्यापरिच्छिन्नद्रव्यसंघ एव इति भावः। ननु द्रव्यसंघ इति। ननु दशतो संघस्य विंशतिनामाभिधानात्संघे विवक्षिते दशतः संघस्यालिकाविंशतिः प =
= रिमाणमस्येत्यर्थे विंशकोगोसंघ इति न विध्यति विंशतिर्गोसंघ इति च न। गवां विंशतिर्गोविंशतिरिति च सिध्यतीति भावः। १८ ननु दशतोः संघस्य गुणिनो दशतो नगा एव इति दशतो विंशतिरिति प्राप्नोति गवां विंशतिरिति न सिध्यतीत आह इत्येति।

संघ इति वर्त्तते न इति। पूर्वसूत्रे द्वंद्व निर्दिष्टस्यापि संघशब्दस्यैव स्वरितत्वादिहानुवृत्तिः। ननु प्राणिसमूहः संघः तत्र च वृक्षाणां विंशतिरिति न प्राप्नोतीत्याह। संघः समूह इति। [redacted] सामान्येन प्राणिनामप्राणिनां च समुदाय संघ इत्यर्थः। ननु चोक्तं परिमाणिनि चेत्युनः स्वार्थे प्रत्ययविधानमिति नैष दोषः। द्रव्यसंघयो द्दशतोः संघे प्रत्ययो निपात्यते ननु द्रव्यसंघे इह द्रव्याणां द्रव्यसंघस्य दशतां दशत्वे संघस्य च परमार्थिको भेदो नास्ति केवलं बुद्ध्या परिकल्प्यते बुद्धिव्यवस्थापितार्थ निबंधनाश्च शब्दा बुद्धिभेदाद्याकारामुपजनयन्तो सत्यपि वास्तवे भेदे भेदमवगमयन्तीति। त एत इति निपातनसामर्थ्याद्विंशत्यादिशब्देन संघे वर्त्तमानाभाववचनाभवं
=दशद्वयात्मके १८

संघ इति वर्त्तते संघः समूहं समुदाय इत्यनर्थांतरं त एते विंशत्यादयः समुदाये संतः भाववचना भवंति। भाववचनाः संतो गुणवचना इति। गुणवचनाः संतो विशिष्टा भवंत्यन्ये गुणवचनेः। अन्येषु च गुणवचनेषु कदाचिद्गुणः गुणिविशेषको भवति। तद्यथा शुक्लः पट इति। कदाचिद्गुणिना गुणो व्यपदिश्यते

भवंः ॥ तद्यथा पटस्य शुक्ल इति॥ ॥ ॥ ॥

ति। भावशब्देनात्र धर्ममात्रमुच्यते भाव इव भावः यथा पाकादिभावः परप्रत्ययः एवमन्योपि धर्मः पराश्रयत्वात् भावः गुणवचना इति। गुणमुक्त्वं तो गुणवचना गुणमुक्ताद्द्रव्यमभिधतीत्यर्थः। अन्यैरिति शुक्लादिभिरुभयवचनैस्तुल्या इत्यर्थः गुणिविशेषक इति। भाष्यकारवचनात् कर्त्तरि चेति अनिसः षष्ठीसमास निषेधः शेषषष्ठ्या वा समासः अथ वा गुणानं विशिनष्टीति कर्म्मण्यणतः स्वार्थे कप्रत्ययः पट इत्येव शुक्ल इति। गुणगुणिनो रव्यतिरेक विवक्षया मतुब्लोपा द्वा समानाधिकरण्यं एवं विंशत्यादीनामपि द्व्येन सामानाधिकरण्यं कदाचिदिति। आधाराधेयभावच्छेदयोपजातव्यतिरेके गुणिना गुणो विशेष्यते पटस्य शुक्लः

=अस्मिन्पक्षेहरिः किं संघाभिधानेसमानाधिकरण्यलक्षणदिगुसमासप्रसंगरूपंदोषमुक्ंमयांतरेणापिपरिहारंअवदंतीतिमुक्तादिव[redacted]त्संख्यासंख्येययोः सामानाधिकरण्यमभिलपरिहरतीत्यर्थः।१ =पक्षेकिं अनेनविंशत्यादीनांसंख्यायामवतीत्युक्तं।२=

भा०कै०५ दशदर्थेचेदितिं।त्र्यस्मिन्पक्षेयोदोषः सपक्षांतरात्रयेणापरिहृयितइत्यर्थः।वचनपरिहारइतिसमुदायाभिधानेच नदोषोनावतरतिसामानाधिकरण्यपेक्ष

२० वतरति।सचपरतः परिहरिष्यते।तिष्ठत्विति।परस्ताद्वक्ष्यमाणत्वात्संहननइति।संघः संहननं तत्रदशातोः संघेवर्त्तनोविंशतिशब्दोगवादिद्रव्यसंघेपरिमा

णे निप्रसयमुत्सादयिष्यतीत्यर्थः।विंश[redacted]तिःपरिमाणमस्यगोसंघविंशकोगोसंघइतिवर्तिष्यतइतिपूर्वार्थाभिधानं।वर्त्तिविव

क्षितानतुविंशतिशब्दः।कदाचिदपिगोसंघेवर्त्तते।गुणिनेति।गवादिनेत्यर्थः।ननुदशत्वसंघस्यगवादिगुणीनभवतिदशतोहिनतस्यगुणिनौनै

=एवंचदशतोविंशतिरितिप्रयोगोनिभावः।१=

तद्युदाताववुउच्यतेविंशत्यादयोदशदर्थेचेत्समासवचनानुपपत्तिरिति।सामानाधिकरण्यंतदागुणगुणिनोः।वचनपरिहारस्तिष्ठतुतावत्स

रिमाणिचेत्पुनः स्वार्थेप्रत्ययविधानमिति।संहननेवृत्तः संहननेवर्त्तिष्यते।संख्यासंहननेवर्त्तोद्रव्यसंहननेवर्त्तिष्यते।अथषष्ठी

तदागुणिनागुणोविशेष्यतेवचनपरिहारः उभयोरेवं उभयोरपिपक्षयोरेवंकृत्वावचनपरिहारः यदितर्हिइमेविंशत्यादयोगुण

वचनाः स्युः सधर्मभिरन्यैर्गुणवचनैर्भवितव्यं।अन्येचगुणवचनाः द्रव्यस्यलिंगसंख्येअनुवर्त्तन्ते।तद्यथाशुक्लंवस्त्रंशुक्लाशाटीशु

क्लः कंबलः शुक्लौकंबलौशुक्लाः कंबलाइति।यदसौद्रव्यंश्रितोगुणः तस्ययल्लिंगंवचनंचतद्गुणस्यापिभवति॥ ॥

षष्ठीपक्षः गवांदशतोऽस्मृताखिकमेदाभावात् गवामपिगुणित्वात्।नत्वत्रावयमि चारात्दशताविंशतिनेविशेष्यतेदशतोविंशतिरितिगोभिस्तुव्याहियावनये

विशेष्यतेगवांविंशतिरिति।यथापटस्यशौक्ल्यमितिपटेनशौक्ल्याव्याहृतयेशौक्ल्यंविशेष्यते।ननुशुक्लेनगुणेनसमवेतंगुणसामान्यंशुक्लस्यशौक्ल्य

मितिव्यभिचाराभावात्वचनपरिहारः उभयोरितिसमुदायाभिधानेगुणाभिधानेचेत्यर्थः।तत्रसमुदायाभिधानेतस्यैकत्वात्तिद्दमेकवचनमितिसामा राम०

र्थ्यात्परिहृतएववचनेनदोषः।सामानाधिकरण्येनुपरिहारउच्यतइतिभावः।तंवचनदोषंयदितर्हीत्यनुभाष्यपरिहरति॥ ॥ ॥ २०

विंशत्याद्यः पुनरिति प्राक्कृतानेषां स्त्रीलिंगत्वादेकत्वं च नान्तत्वाच्च शतस्य नपुंसकत्वादेकवचनान्तत्वाच्चेति भावः। विंशती विंशतयः शते शतानीति तु प्रचयविवक्षायामेव। शोभवति। गावो धनमिति। धनादीनां साकांक्षत्वात् भेदकत्वात् क्रियायां पारतंत्र्याच्च गुणत्वं। यथा शुक्लमित्युक्ते किं तदिति निरस्तं द्रव्यमाकांक्षति शुक्लं च वस्त्रमिति द्रव्यस्य भेदकं शुक्लमानयेति क्रियायां द्रव्यपरतंत्रं द्रव्यानयनमंतरेण गुणानयनासंभवादिति शौक्ल्यं गुणः एवं धनमित्युक्ते किं तदिति गवाद्याकांक्षति गावो धन[redacted]मिति गवां प्रीतिहेतुत्वावगमात् भेदकं धनमानयेत्युक्ते गवादि द्रव्यानयनात् क्रियायां पारतंत्र्यमिति धनं गुणः। उडुपशतानीति। अत्र संख्यालक्षणस्य गुणस्यतरणे

साकांक्षत्वादिति। आणमदधर्मावछिन्नद्रव्यसाकांक्षत्वादित्यर्थः। एवं भेदकत्वान्ततंत्र्यादिस्तनयोरूत्तं। आणमदत्वं तु यावत्तिमिति संबंधितं। अतिनगोनादेत्रयातं। शुक्लादेस्तु न तस्योत्तसादिमत्तेनानिसत्वाभ्युपगमाद्। निसत्वेयानतसंबंधस्यानिसत्वात्। तथा धनत्वादेर्द्रयाणि गुणत्वं

विंशत्यादयः पुनर्नोनुवर्त्तंते अन्ये पि वै गुणवचना नाव श्यं द्रव्यस्य लिंगसंख्ये अनुवर्त्तंते गावो धनं पुत्रा अपत्यं इंद्राग्नी [redacted] देवता विश्वेदेवता यावंतस्ते तावाशिता मनुष्यं तिस्रै वै ते दक्षिणा समृद्धा इति अथात्रानुवृत्तौ हेतुः शक्योवक्तुं वा शक्यो वक्तुं कामंतद्धेच्च तां। इह कदाचिद् गुणः प्राधान्येन विवक्षितो भवति। तद्यथा पंचोडुपशतानिती र्णानि पंचवध्रीशतानिती र्णानि अश्वै युद्धमसिभि युद्धमिति न चासयोर्युध्यंते असिर्गुणः पुरुषा युध्यंते। गुणस्तु खलु प्राधान्येन विवक्षितो भवति॥ ॥ ॥ ॥

प्राधान्यं विवक्षितं तीर्णानीति कर्त्तरि निष्ठाभिधानात् न त्वतत्संख्येयानामुडुपानां प्लवनेकर्त्तृत्वं अथवा उडुपानां करणानामेव कर्त्तृत्वविवक्षायामिदमुदाहरणं। अश्वैरिति। अश्वा असयश्चाधिकरणत्वात् करणत्वाच्चोपकारित्वात् गुणा अपि संतः प्रहारे प्राधान्येन विवक्षिताः कर्त्तरि तृतीयाविधानात्॥ ॥ ॥

=नैरवादिरेषो वहुलकृ[illegible]:।१= नपुंसकलिंगत्वेऽपि न वचनस्य हेयमेतत्तुल्यमिति तत्रैव बहुतोऽनेकमिति तात्पर्यं। गावः इत्यस्यापि पुंसाधारणत्वात् संतत्र गम्यस्य लिंगविशेषस्य धनमिति लिंगस्य सर्वनामनपुंसकत्वस्य च कुंशात्पदे पितुर्वाद्यस्य विशेषलिंगबोधकत्वं तदभावस्तिविशेषात्।२= [illegible]:।२=

क्षिणोते धेनमिति। समुदायस्य प्रीतिहेतुत्वाच्च न त्वं न त्वेकैकस्य गोपिंडस्येति धनमेकं गोभिर्विशेष्यते। आश्रितसंख्याविशेषाच्च गोपिंडा धनं विशिंषंतः समुदायस्य प्रीतिहेतुत्वं प्रसा-
ययंतीति गावोऽपि धनसंख्यां नानुवर्तंते गौर्धनमित्युक्ते विवक्षितार्थानवगमात्। अपतनादिति। बहूनां चापतनहेतुत्वं न त्वेकैकस्य तथा चोच्यते। वरमपुत्रत्वं न त्वेकपु-
त्रेतेति लोकाश्रयत्वाल्लिंगस्यापत्यशब्दो नपुंसकलिंगः एवमप्युच्यते। प्रत्येकं त्वपतनहेतुत्वे विवक्षिते पुत्रा अपत्यानीति बहुवचनं भवत्येव। इंद्राग्नी देवतेति। सं-
घस्य देवतात्वमेकं हविष्यग्नीति द्विवचनाभावः। देवते इत्युच्यमाने प्रत्येकं देवतात्वप्रतीयेत तत्र च विकल्पेन देवताकार्यं स्यात् यथा खादिरे वध्नाति पालाशे वध्नातीति वध्ना-
तावेकार्थत्वादधिकरणविकल्पः सर्वैर्ते दक्षिणेति। अत्रापि समुदायस्य दक्षिणात्वमिति प्रत्येकवचनं दक्षिणा इति तु बहुवचने दाने विकल्पः स्यात्। विंशसादिष्विति। विं-

=ननु देवतापदार्थे [illegible] धर्मसंघस्यैव।२= प्राधान्यं चतुर्थीत संख्या वत्वेनैव लः सराश्रयमीति:।१=

इह नाव द्वावो धनमिति क्षिणोते इत्येनं एकोगुणः सच प्राधान्येन विवक्षितः। पुत्रा अपत्यमिति अपतनादपत्यमेकोगुणः सप्राधान्येन विवक्षितः। इंद्राग्नी देव-
ताविष्वे देवा देवता इति। दिवेरैश्वर्यकर्मणो देवस्तस्मात्स्वार्थे तल्। एकोगुणः सप्राधान्येन विवक्षितः यावंतस्ते तावंतस्तान् अनुयंति सर्वैर्ते दक्षिणास-
मृद्ध्या इति। दक्षे दक्षिणा एकोगुणः सप्राधान्येन विवक्षितः विंशसादिषु चाप्येकोगुणः सप्राधान्येन विवक्षितः। अयं तर्हि विंशत्यादिषु भावबहुवचनेषु दो-
षः गोविंशतिरानीयतामिति भावानयने चोदिते द्रव्यानयनं न प्राप्नोति। नैष दोषः इदंतावदयं प्रष्टव्यः अथेह गौरनुबंध्योऽजोऽग्नीषोमीय इति क्रयमा-

=समवाद्विकर्मणः।२= (१कृतौ चोदितायां द्रव्ये आरंभणालंभनविशसनादीनि क्रियंत इति॥ ॥ ॥

शतिसंख्या समुदितद्रव्यसमवायिनी न तु प्रत्येकं प्रमुत्कादिवत्परिसमाप्नोति द्रव्यगते लिंगसंख्ये नानुवर्तेते पंचादयस्तु नित्यं संख्येयवचना इति संख्येयलिंगसंख्यानुवि-
धायिनः भावानयन इति। न ह्यन्यस्मिंश्चोदितेऽन्यस्यानुष्ठानं युक्तं न हि दंडं छिंधीत्युक्ते कश्चिद्देवदत्तं छिनत्तीति भावः। इदं तावदिति। अन्यस्मिंश्चोदितेऽन्यत्रापि त-
दव्यभिचारिणि कार्यं दृश्यत इति प्रत्याप्रश्नः॥ ॥५॥ ॥५॥ ॥५॥ ॥

पर्यवसानेन

=समुदितेति अयंभावः यथैकेनैव धर्मेणासज्य रक्तिता सहधर्मिणोनेकस्य जेतृ भावो प्रतिपाद्यते [illegible] बोधकत्वादिति द्रव्यलिंगसंख्यान वर्तते यथापि धनादिभावानामपि धर्मिबोधकारकत्वात्तथापि नतेनि संख्यान्वयप्रतिधर्मानुविधान=

असंभवादिति। आकृतौसा क्षात्कार्याणामसंभवाद्द्रव्येषुकार्याणि क्रियंत इत्यर्थः॥ ये पुनस्तावद्व्यतिरिक्ता जातिः ते षामेतदेव ज्ञातौ कार्यं [redacted] चोद्यमानं द्रव्यविषयमेवोपतिष्ठते यथा चाग्निमानयेति चोदिते नातरीयकत्वाद्चोदितमपि यात्रमानीयते। तथा जातिचोदनायां द्रव्ये क्रियाप्रवृत्तिः अव्यतिरेका दिति। जातिद्वतो गुणगुणिनोस्तु नान्तिक भेदाभावौ मेवते न दारेणतास्कृतास्कृ क्रियास्कृचोद्यत इत्यर्थः॥ सहस्रार यस्कुर षोदशादित्वाद्नुज्ञातसाधिमानः। छेदादि ।। छेदादिपथिभ्य इति। निसग्रहणं प्रसयांतरनिरसर्थं तावदिह नभवतितस्या प्राप्तत्वात्। यथैव ऊर्णपूर्वात् ठञ् निसमिस त्र निसग्रहणमनुप निवसर्थं। तथाहि छेदादिभ्य इति ठ ग्विधीयते। न चतेभ्यः प्रसयांतरप्रसंगः पथिशब्दात्कन् प्रसयो विधान सामर्थ्यात मेव मेव

असंभवादाकृत्ताधारंभणादीनांसंभवो नास्तीति कृत्वा आकृतिसहचरिते द्रव्ये आरंभणादयः क्रियंते द्रमप्येवं जातीयकमेव असंभवाद्वावा नयनस्य द्रव्यानयनंभविष्यति अथवा अव्यतिरेकात्। छेदादिभ्यो नित्यं। पथोण नित्यं। छेदादिपथिभ्यो विग्रह दर्शनात् नित्यग्रहण नर्थकं छेदादिपथिभ्यो [redacted] निसग्रहणमर्थकं किं कारणं विग्रहदर्शनात्। विग्रहो दृश्यते छेदमर्हतिपंथानं गच्छतीति वि

॥काणार्थं तर्हीदं निसग्रहणं कर्त्तव्यं निसग्रहणं क्रियते॥ ॥ ॥

प्रसयांतरस्यनुप्रसंगाभावः नापितद्विषयार्थं निसग्रहणं यथाक्रमेन्नित्यमितिमप्रस्ययार्थ्यत्र अंतप्रयोगनिवारणफलं निसग्रहणं छेदादीनामस्यत्रप्रयोगस्येष्ट त्वात्। नापिप्रसयार्थविशेषणं नित्यं छेदमर्हतीति सस्यार्थस्यासंभवात्। नहि कश्चित्सदार्थो नित्यं छेदमर्हतीति योपि वेतसादिरर्थः छिन्नः प्ररोहतिसोपि न नित्यं छेदमर्हति कालांतरेतस्य छेदप्रवर्त्तनात्। नित्यं पंथानं गच्छतीति यद्यप्यर्थः संभवतितथापि नात्रैवार्थे पांथशब्दस्य प्रयोग इष्यते कदाचिदृच्छस्यपिप्रयोगाद्वाक्यनिरस र्थं निसग्रहणं स्यात्॥ यथा नित्यं क्रीडाजीविकयोरिति एतदप्यप्रयोजनं शिष्टप्रयोगे वाक्यस्यदर्शनात्॥ ॥ ॥

भा॰कै॰५ २२ विकारेणेति। निःसग्रहणं विकारेण संबध्यते विरंगादेशः पंथ्यादेशश्च निसंप्रसयविषयौ भवतः ननु ताभ्यां वाक्यं कर्त्तव्यमिति सर्वेः अन्यथा तयोः साधुत्वं सर्वविषयमिति सा
शं कर्येत प्रत्ययविधानं त्वन्वाचीयमानं विज्ञायेतेति भावः। अकङादिभिरिति। स्कधातुरकङ्च कल्याणादीनामिनङ् परस्त्रीपरमुंचेति प्रत्ययसन्नियोगेन विधीयमाना
नामादेशानां तदभावे प्रसंग एव नास्तीति नार्थो विकारेण वाक्यनिषेधार्थेन निःसग्रहणेन। सन्नियोगशिष्टानामिति। विशिष्टप्रयोगसिद्धयेययोरेकस्मिन्विषये विधिः
तयोस्तद्विषयादन्यत्रैकस्याप्रयोगेपरेपिन प्रयुज्यते। यथा भ्रुवः भृचेति भ्रूसन्नियोगेन विधीयमानस्य भृ भावस्य विषयांतरेप्रयोगाभावो। एवं न्यासिद्धस्यार्थस्य

विकारेण विग्रहो मामूदिति विसर्गविरंगाच पंथ्यो नि सामिति विकारार्थमिति चेदकङादिभिस्तुल्यं विकारार्थमिति चेत् अकङादिभिस्तुल्यमेतत् यथाऽ
=अकङादिभिस्तुल्यमितिसेनतकिं=
=मकङादिषु कर्त्तव्यताधास्तेतकिं=
=वानद्दिराकर्त्तव्यतोच्यतइ=
=तिप्रच्छ्यति॰ किंपुनरिति॰२=
कङादिभिर्विकारैर्विग्रहो न भवति। एवमाभ्यामपि न भविष्यति किं पुनरिहाकर्त्तव्यं निःसग्रहणं क्रियते आहोस्विद्न्यत्र कर्त्तव्यं न क्रियते इहाकर्त्तव्यं क्रियते
[redacted] एष एवन्यायो यदुत सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यभावस्तद्यथा देवदत्तयज्ञदत्ताभ्यामिदं कर्त्तव्यमिति देवदत्तापाये यज्ञदत्तोपि न
करोति। यज्ञलिंग्यां घात्वनौ यज्ञलिंग्यां तत्कर्माहेतौ रूपसंख्यानं यज्ञलिंग्यां तत्कर्माहेतौ रूपसंख्यानं [redacted] कर्त्तव्यं यज्ञकर्माहेतियज्ञियोरे
॥शः ऋत्विक्कर्माहेति। आर्त्विजीनं ब्राह्मणकुलमिति॥ ॥ ॥

विल्वकादिभ्यश्छस्य लुगित्यत्र लिंगं वक्ष्यतेऽइदं कर्त्तव्यमिति॥ धर्मेनिर्णयादिकं तत्र स्येयस्यसंदेहसंभवादनधिकारः॥ यज्ञर्त्विक्तत्कर्माहेतीति ननु वृत्तिविषयेयज्ञार्थेव्या
पारे यज्ञशब्दस्य वर्त्तमानस्य दुःस्रक्तेणैवप्रत्ययो यथा मृदंगवादनरंजनेमृदंगशब्दाट्ठक्भवति माद्ङ्गिक इतिनेतद्स्ति तत्र हि गौणार्थवृत्तिभ्यएव प्रत्यय इष्यते ननु मुख्यार्थवृत्ति
भ्यस्तत्र गौणमुख्यपरिभाषा तत्र नाश्रीयते इह तु यज्ञयज्ञमर्हतीत्यत्र तत्कर्म तयोरपि प्रत्यय इष्यते तत्र मुख्यार्थे संभवे गौणपरिग्रहस्यान्याय्यत्वात्तेनासिध्यतीति एम॰
वार्त्तिकारंभः ननु योदेशो यज्ञकर्माहेति स यज्ञमर्हतीति नार्थो वार्त्तिकारंभेण नैतदस्ति यस्य यज्ञेधिकारः स यज्ञमर्हति अधिकारश्च कर्मैरर्थिनो विद्वषःशास्त्रेणाप २२

पारायणनिर्देश इति इष्टार्थसाधनत्वाभावान्निर्देशकार्याकरणादनिर्देशः पारस्येति शिष्यस्य करोतीति उच्चारयतीत्यध्यापक इत्यर्थः । शिष्यस्तु केवलं श्रवणेन तु निष्पादयति अध्यापकाधीनत्वात्तन्निष्पत्तेरिति भावः । तुरायणमिति यजमानविशेषमूर्तिविशेषस्य व्यापारत्वान्निष्पादयतीति यजमानस्तु स्वामी मात्रमिति भावः ॥ उ

पारायणतुरायणचान्द्रायणं वर्त्तयति । तद्वर्त्तयतीत्यनिर्देशः तच्चादर्शनात् तद्वर्त्तयतीत्यनिर्देशः अगमकोनिर्देशः अनिर्देशः पारायणं कोवर्त्तयति यः परस्य करोति । तुरायणं कोवर्त्तयति । यजमानः पुरोडाशान्निर्वर्त्तयति । तच्चादर्शनात् । न चैतत्त्रयस्य योर्दृश्यते । इज्याज्योश्चदर्श नात् । इज्याज्योश्च समस्ययोर्दृश्यते यः पारायणमधीते स पारायणिक इत्युच्यते । यस्तुरायणेन यजते स तौरायणिक इत्युच्यते । यश्च वा धीते यश्च परस्य करोति । उभौ तौ वर्त्तयतः [redacted] यश्च यजते यश्च पुरोडाशान्निर्वर्त्तयति उभौ तौ वर्त्तयतः उभयत्र कस्मान्न भवत्यनभिधानात् । योजनं गच्छतियोजनं गच्छतीति क्रोशशतयोरूपसंख्यानं योजनं गच्छतीत्य शतयोजन च
त्र क्रोशशतयोजनशतयोरूपसंख्यानं कर्त्तव्यं क्रौशशतिकः योजनशतं गच्छति योजनशतिक इति । ततोभिगमनमर्हतीति च क्रोशशत योजनशतयोरूपसंख्यानं कर्त्तव्यं । क्रोशशतादभिगमनमर्हति । क्रौशशतिको भिक्षुः योजनशतादभिगमनमर्हति योजनशतिको गुरुः ॥ ॥

भौतावितिः अन्यतरासन्निधौ क्रियायामनुत्पादादुभयोः कर्त्तृत्वं । यश्चेति यजमानो देवतोद्देशेन स्वं द्रव्यं त्यजतीति तस्यापि तुरायणनिर्वर्त्तकर्तृत्वं तदेवं भाष्यकारेण यथान्यासं सूत्रं समर्थितं । अनभिधानादिति । अध्यापकेयाजके च प्रयोगाभावात् ॥ ॥ ॥ ॥

भा॰कै॰५ उत्तरश्चकारः प्रत्ययार्थसमीपे श्रूयमाणः प्रत्ययार्थमेव गच्छतीत्येनं समुच्चिनोति समर्थविभक्तिस्तत्रापि सन्नोपात्तात् तीयैव तेन वारिपथेन गच्छतीत्यादिः पाठो
२३ युक्तो न द्वितीयांत पाठः द्वितीयापक्षे आक्रांते अनाक्रांते च प्रकृत्यर्थे प्रत्ययः स्यात् संक्रांत एव दृष्यते॥ मधुकमरिचयोरिति। अत्र मुख्यगमनासंभवाद्दा
हृत एव प्रत्ययमिच्छंत्यन्ये तु गौण गमनाश्रयेण गच्छतीत्यत्राप्यर्थे प्रत्ययमाहुः प्रत्ययार्थोपाधिलाघ्वाद्द्वयोरसंदेहार्थो न्यतरप्रयोगं तमधीत्य अधीष्टम् तयो

उत्तरपथेना आहृतमकरणे वारि जंगलस्थलकांतारपूर्वपदादुपसंख्यानं कर्त्तव्यं वारिपथेन गच्छति वारिपथिकः वारिपथेनाहृतः। वा
रिपथिकः वारिजंगलपथेन गच्छति जांगलपथिकः जंगलपथेनाहृतं जांगलपथिकं॥ जंगलस्थलपथेन गच्छति स्थालपथिकस्स्थ
लपथेनाहृतं स्थालपथिकं स्थलकांतारकांतारपथेन गच्छति कांतारपथिकः कांतारपथेनाहृतं कांतारपथिकं। अजपथशंकुपथा
भ्यां चेति वक्तव्यं। अजपथेन गच्छति आजपथिकः। अजपथेनाहृतं आजपथिकं। शंकुपथेन गच्छति शांकुपथिकः॥ शंकुपथेना
हृतं शांकुपथिकं। मधुकमरिचयोरणस्थलात् वक्तव्यः॥ स्थालपथं मधुकं स्थालपथं मरिचं तमधीष्टो भृतो अधीष्टभृतयोर्द्वि
तीया [redacted] निर्देशो नर्थकस्तत्रादर्शनात्॥ अधीष्टभृतयोर्द्वितीयानिर्देशो नर्थकः किं कारणं। तत्रादर्शनात्॥ न ह्यसौ मासम
=स्थलात्सरोयःपथिशब्दस्तद्दंत्य मधुमरीचयोरणित्यर्थः॥ मधुकमितिकः स्वार्थे मधिकिपाठं नारायणः॥ अधीष्यते किं तर्हि मुहूर्त्तमसौ अधीष्टो मासं तत्कर्म करोति॥ ॥ ॥
रिति। यावंतं कालमध्येषणं भरणं च क्रियते ततः प्रत्ययो नेष्यते अध्येषणभरणफलव्यापारव्याप्यात्तु कालादिष्यते। ततो न प्राप्नोति तस्माद्ध्येषणा राम॰
भरणाभ्यामव्याप्याद्द्वितीयानुपपत्तिरिति निष्प्रयोजनो द्वितीयानिर्देशः॥ ॥ ॥७॥ ॥ २३

=अध्येषणादिफलतोयोव्यापारः कर्मकरणादिरूपस्तव्याप्यानेनासंनमंयुक्तात्।१=

सिद्धं तिति तेनमासायाधीष्टो मतोवेतितादर्थ्ये चतुर्थ्येतात् प्रसयंमासव्याप्यिव्यापारार्थे [redacted] मधीष्टइ सर्वेः तादर्थ्यादिति। मासादिशब्दाः ऽध्येषणाभरणाव्याप्तमुहूर्तादिकालवाचिन एवामी यंतेभूतभाविनोस्तप्रसयविधौ मुख्यार्थवत्तय इति विभागोऽलक्ष्यपरतंत्रताल्लक्षणस्य। अवयः। अनंतरस्येति एपतः द्वेष्यम्निति। विपरी

चतुर्थीनिर्देशः कर्तव्यः। न कर्तव्यः।१

सिद्धं चतुर्थीनिर्देशात् सिद्धमेतत्कथं चतुर्थीनिर्देशाच्चतुर्थीनिर्देशः कर्तव्यः तस्मायधीष्ट इति सतोहि तादर्थ्या त्वाछ ह्यमविष्यति॥ मासाय्योमुहूर्त्तोमासः॥ अवयसिठं अ। अवयसिठं श्चेसनंतरस्यानुकर्षोद्रष्टव्यः। द्वेष्यं विजानीयात् इयमप्यनुवर्तेत इतितदा चार्यः सुहृद्भूत्वाचष्टे। अवयसिठं श्चेसनंतरस्यानुकर्ष इति। षष्टिकाः। षष्टिके संज्ञाग्रहणं। [redacted] षष्टिके संज्ञाग्रहणं कर्त्तव्यं मुद्गा अपिहिषष्टिरात्रेण पच्यंते तत्र मा भूदिति। उक्तं वा। किमुक्तं। अनभिधानादिति॥ ॥

नपिसर्थेः। अवृहितस्यापिकेचिदनुवृत्तिर्दृष्टायथाद्वितीयादौ स्वेनइसतैतदइवइदमइतिदर्शनादिहापि कश्चिदृद्धाम्येदिसर्थेः। षष्टिकाः बहुवचनमतंत्रमेकवचनां तस्यापिषष्टिकशब्दस्यलोके प्रयोगात्संज्ञाग्रहणमिति। षष्टिरात्रेण पच्यंत इसत्रार्थे निपातसमानस्य धान्यविशेषएव प्रयोगार्थे अनभिधानादिति। लोके स्वार्थे प्रयुज्यमा

॥ नान्ना शब्दानां साधुत्वमात्रमनेन प्रतिपाद्यते न त्वर्थे नियोगः क्रियते॥ ॥ ॥

भा०कौ०५ तदस्य। द्विधेदं सूत्रं व्याख्यायते। तदिति द्वितीयासमर्थात् कालवाचिनोऽस्येति षष्ठ्यर्थे ठञ् भवति ब्रह्मचर्यं चेद्गम्यते। मासं ब्रह्मचर्यमस्य मासिको ब्रह्मचारी। तथा
२४ तदिति प्रथमासमर्थात्कालवाचिनोऽस्येति षष्ठ्यर्थे ठञ् भवति यत्तदस्येति निर्दिष्टं ब्रह्मचर्यं चेद्भवति मासोऽस्य ब्रह्मचर्यस्य मासिकं ब्रह्मचर्यमिति। यावता कर्मणा
सम्प्राधान्यात् प्रथमैव भवति न तु द्वितीया। तस्य प्रथमसयार्थत्वात्समर्थपलप्याषष्ठी समर्थविभक्तिः। न चतत्। इति। चरणा(।) मनुष्ठानं तच्च क्रियाविषयमिति

४स्याः षष्ठीविषये विधानात् महानाम्न्यादिभ्य इति ब्रह्मचर्य [redacted] ९४

तदस्य ब्रह्मचर्यं। तदस्य ब्रह्मचर्यमिति महानाम्न्यादिभ्य उपसंख्यानं। तदस्य ब्रह्मचर्यमिति महानाम्न्यादिभ्य उपसंख्यानं कर्त्तव्यं। महाना
म्नीनां ब्रह्मचर्यं [redacted] महानाम्निकं आदित्यव्रतिकं। तच्चरतीति च। महानाम्न्यादिभ्य उपसंख्यानं कर्त्तव्यं। महानाम्नीश्चरति महा
नाम्निकः। आदित्यव्रतिकं नैष युक्तो निर्देशः तच्चरतीति च। महानाम्न्यो [redacted] नामर्चः॥ न चेता
श्चर्यन्ते व्रतं तासां चर्यते। नैष दोषः साहचर्यात्ताच्छब्द्यं भविष्यति महानाम्नीसहचरितं व्रतं महानाम्न्यो व्रतमिति। अवान्तरदीक्षादिभ्यो डि
निः। अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः। अवान्तरदीक्षी तिलव्रती। अष्टाचत्वारिंशतो ड्वुंश्च। [redacted] डिनिश्च वक्तव्यः। अष्टाचत्वारिंशकः
अष्टाचत्वारिंशी चातुर्मास्यानां यलोपश्च ड्वुंश्च डिनिश्च वक्तव्यः चातुर्मासकः॥

भावः महानाम्न्यो व्रतमिति लिङ्गसंख्ये अजहदेव महानाम्नीशब्दो व्रते वर्त्तते। डिनेर्डित्करणमष्टाचत्वारिंशादर्थं अन्येषां यस्येति लोपेन रूपस्य सिद्धत्वात्। अष्टा
चत्वारिंशक इति वृत्तिविषये वर्षशब्दो वर्षसंख्येयेष्वष्टाचत्वारिंशच्छब्दो वर्त्तते। चतुर्षु वेदेष्वष्टाचत्वारिंशतं वर्षाणि व्रतं चरंति। प्रतिवेदं द्वादश वर्षाणि व्रतचर राम०
१ण्न॥ ॥ ॥ ॥ २४

=आषाढी कार्तिकी फाल्गुनी नामेषा संक्रेति वृत्तिः ॥ १ ॥=

चातुर्मासीति। तत्र भवद्द्रसे वाणं सिद्धः तस्मात्तु द्विगोर्लुग नपत्य इति लुक् प्राप्नोतीति पुनररण् विधिः कालात् ठञ्जित्यस्या प्राप्तिः समुदाय स्या कालवाचित्वात् ततं रंतं विध्यभावाच्च

केचित्तु यथा कथं चित्कालत्वं तेषां मन्द्र ष्टत्वाद्द्व्येव प्राप्नेत स्य च लुक्किन्द्र समणं विधानमिसाद्दुः। तस्याः आख्या ग्रहणमिति यज्ञेभ्य इति बहुवचन निर्देशात् स्वरूप ग्रहणाभावा

त्तद्यर्थाभिधायिभ्यः प्रत्ययो लभ्यत इति प्रश्नः। संज्ञीभूतकाः सर्वे लोक प्रसिद्धाः प्रसिद्धत्वादेव तेषां सामुख्यादिति भावः। यत्त्वेति बहुवचन निर्देशाद्यज्ञ शाखानां स्वरत्येरन्

नाम्य एवं यज्ञ शङ्ख श्रुतिर्बहुवचनं व्याप्तनुग्रहीतं भवतीति भावः। आख्याग्रहणादितिये यज्ञं प्रसिद्धं प्रसिद्धं वाच क्षते सर्वेभ्य पृष्ठन्भवति तत्र चदीयते कार्यमिसेतयोरर्थयोः

=तस्य नत्वमितिलेमस्यपाद् क्षिणलक्षिणेमेजवर्ती किलुयज्ञेभ्यस्वेतिठञ् आक्षिप्यति नेनतत तत्र व्याख्यानयनात्मइतिवर्ततेनामग्रहणादव्याख्यानयहेनप्रसिद्धग्रंथोग्व्यते किंच द्वयोर्बीजपयवोर्द्वैवाजपेयिकी सत्र तदंत विध्यभावान्स्यात् मिवाद्विगोरिति लुक्प्रसात् अत्रतुमासदवेति=

चातुर्मासीति अथ किमिदं चातुर्मास्यानामिति। चतुर्मासासेथ यज्ञेतत्र भवे चतुर्मासा मपावक्तव्यः यज्ञे तत्र भवद्रसे तस्मिन्नर्थे चतुर्षु चतुर्षु मासेषु

भवंति चातुर्मास्या नियज्ञाः। संज्ञायामण्। संज्ञायामण् वक्तव्यः चतुर्षु मासेषु भवति चातुर्मासी पौर्णमासी॥ तस्य दक्षिणा यज्ञाख्येभ्यः आख्या

ग्रहणं किमर्थं। तस्य दक्षिणा यज्ञेभ्य इतीयत्युच्यमाने यएव संज्ञीभूतकाः यज्ञास्ततउत्स न्निः स्यात्। आग्निष्टोमिकस्य राजसूयिकस्य यत्र वायत्तश ब्दोस्ति

नाव यज्ञिकस्य पाकयज्ञिकस्य रहनस्यात्। पांचौदनिकस्य आख्याग्रहणे पुनः क्रियमाणे न दोषो भवति ये च संज्ञीभूतकाः यज्ञा ये च न संज्ञीभूतकाः यत्रा

यत्र च यज्ञशब्दोस्ति यत्र च नास्ति तेषां सर्वेषां ग्रहणं सिद्धं भवति। तत्र च दीयते कार्यं भववत्। कार्यग्रहणमनर्थकं तत्र भवेन कृतत्वात्। कार्यग्रहणमनर्थकं

किंकारणं। तत्र भवेन कृतत्वात्। यद्धि मासे कार्यं मासे भवं तद्भवति तत्र तत्र भवद्रसे वसिद्धं किमिदं भवान्। कार्यग्रहणमेव मस्या चष्टे न पुनर्दीयते ग्रहण

मपि यथैव द्वाह्रिय न्मा से कार्यं तन्मासे भवं भवति एवं यद पि मासे दीयते तद पि मासे भवं भवति। तत्र भवद्रसे वसिद्धं न सिध्यति न तन्मासे दीयते कें तर्हि मासे

कालवाचिभ्यो भवत्। प्रत्यया भवंतीति सूत्रार्थः तत्र कार्ये स्य भवेच्छं तर्मो वादेवात्र प्रत्यया नां सिद्धिमत्वाह। कार्यग्रहणमिति। गते मास इति। मासे दीयत इति नैपाधिकरणसप्त

मीकिं तर्हि यस्य च भावेनेति तत्र भवद्रसत्र चाधिकरणसप्तम्यामाश्रितोऽपपद विभक्तेः कारकविभक्तिर्बलीयसीत्याया दिह लातिदेशसामर्थ्यात्भाव लक्षणसप्तमी परिग्रहः॥

=आख्याग्रहणमनर्थकं दिदेवा=
=तत्कालादित्यस्यासंबंधः अन्यथा=
=द्वादशाहिकी सत्रैव स्याद्दिवाकुः=

=औपेति उपसमीपे श्लेषः संबंधस्तेन वर्त्तते गावद्र्ध्यैन्द्रेव सामीपिकमिदमधिकरणमित्यर्थः।१=

भा०कै०५ औपश्लेषिकमिति मासे अतिक्रान्ते यत्तद्दीयते तत्समास औपश्लेषिकमधिकरणमिति तत्र भवदुःस्सनैव सिद्धमित्यर्थः। कारकप्रकरणे चुरोणास्यापि संज्ञा भवतीत्युक्तं।

२५ एवं तर्हीति। प्रत्ययविध्यर्थं दीयत इत्युपान्ते नलुतिदेशार्थं तेनाग्निष्टोमे दीयते अग्निष्टोमिकं भक्तमिति सेवुमादिति इकेचिरादुः दीयमानस्य भवत्यात्क्रतुयज्ञे

औपश्लेषिकमधिकरणं विज्ञास्यते। एवं तर्हि योगविभागोत्तरकालमिदं पठितव्यं तस्य दक्षिणायज्ञाख्येभ्यः तत्र च दीयते ततः कार्यं भववुला लादिति [redacted]। सुष्टादिभ्योण। अणप्रकरणो ऽग्निपदादिभ्य उपसंख्यानं कर्त्तव्यं। त्रीणीमान्यणग्रहणानि सुष्टादिभ्योणसमयस्तदस्यप्राप्तं कृतोरण प्रयोजनं विशाखाषाढादणमंथदंडयोरिति त्रीणीति तत्र न ज्ञायते। कतरस्मिन् अणप्रकरणे अग्निपदादिभ्य उपसंख्यानं कर्त्तव्यं ॥ अविशेषात्सर्वत्र। सुष्टादिभ्यः अणभवती सुत्वा अग्निपदादिभ्यश्चेति वक्तव्यं। अग्निपदे दीयते कार्यं वा आग्निपदं। पैलुमूलं। समयस्तदस्य प्राप्तं कृतोरण। अग्निपदादिभ्यश्चेति वक्तव्यं। उपवस्ता प्राप्तोस्य औपवस्त्रं। प्राशिता प्राप्तोस्य प्राशित्रं प्रयोजनं विशाखाषाढादणमंथदंडयोः अग्निपदादिभ्यश्चेति वक्तव्यं। चूडा प्रयोजनमस्य चौडं। श्रद्धा प्रयोजनमस्य श्राद्धं॥ ॥ ॥

=गतुल्लुक्=१ कार्यं ग्रहणमिति भववाद्रित्यादिरेणार्थकार्यग्रहणं न कर्त्तव्यं सुष्टादिभ्योणोस... दैवत्तुतकार्यतु तस्यानुवृत्तस्यर्थं १=

भ्यश्चेति ठञ्सिद्ध इति तदुक्तं व्याख्यातव्य नाम्न इति तत्रानुवर्त्तते नान्तरे वं कार्यग्रहणमेव वाक्निकृता प्रत्याख्यानं। प्राव्वृत्तेः संख्यापूर्वपदानामिति वचना

द्वयोर्वाजपेययोर्दीयते द्वैवाजपेयिकमित्यत्रापि योगविभागाट्ठञ्भवति। सुष्टा० अणप्रकरणे इति प्रकरणं प्रस्तावः। अग्निपदादिभ्य इति। आदिशब्दः प्रका एम०

ऽरेतत्रत्यचिदर्थंकुतश्चिदरण प्रत्ययो भवति तत्राणदर्शनमात्रकृतं सादृश्यमाश्रीयते॥ ॥ २५

=तद्भाष्येतयोनयोदाहरणमुदर्शितं अन्यत्प्यासर्वेभ्यः सर्वत्रार्थेप्राप्नोति १=

=प्रयासूयातमिति अत्राकुर्विवरणकारा ःद्वयोर्मासयोः कार्यं द्वैमासिकमित्यत्रापि द्विसंयोग्यास्यादिति तत्रोक्तं कालाङ्ञ्ञातु नसिध्यति द्विगोर्लुगित्यस्य प्रसंगात् अनेन प्रत्ययेनलुक् अप्राग्दीव्यतीयत्वादनार्ह्दसाच्च नन्वनेनापि ठञ्लुक्स्यात्प्रत्यतोवतिः सर्वसादृश्यार्थ इति तेनदक्षिः प्रत्ययमा=

=त्रस्य दृष्टेन लुक श्वेति परिज्ञानादिति नरूपेलक्षमं तेयनोवतिः सर्वसादृश्यार्थो ...... विधिर्न भवति योगविभागे तु सति न वति नववादित्यस्य तभावाभावात् नरूतद्भ्रंसंथापकेयट नदिवाजपेयिकसिद्धिरित्यते ३

=कालाट्ठञित्यत्रान्त्रचरुष्याकालवाचिनां ग्रहणं मन्त्रमा ःनतेनद्युक्त दितिनिरूपितमन्यत्र १ =अत्रेदंतत्त्व केचिदुपदर्शितवानिकालत्रयप्रसारव्यानपक्षेमवादिसनेन तु कोप्यानिरोणा द्वैमासमिसेवभवति मन्त्र वमेतेनु द्वैमासिकमिती ति १=

अनुप्रा॰ अनादिति॰ अनसङ्केवृत्तस्य पूर्वे पदे न संबंधाभावात् सामर्थ्याच्च ईतग्रहणं॥ स्वर्ग्यमिति स्वर्गः प्रयोजनमस्येति ठञि प्राप्ते यद्विधिः पुण्याहवाचनादिभ्य इति साह
चर्यादभिधानेऽसिद्धे भेदविवक्षायां प्रत्ययश्रवणान्निरसार्थं लुग्विधानं ऐका॰ एकागारादिति प्रयोजनमित्यनेनैव ठञः सिद्धत्वात्तत्रं निपातनार्थेन कर्त्तव्यमित्यर्थः॥ ठञ्प्रकर
णादिति॥ प्रयोजनमित्यत्र ठञ्प्रकृतस्तेनैवैकागारिकशब्दः सिद्ध इत्यर्थः॥ एकशब्दोऽसहायवाची॰ असहायं गृहमस्य मुमुषिषोः प्रयोजनं तदैकागारिकः ससहाय

अनुप्रवचनादिभ्यश्छः॥ छप्रकरणे विशिपूरिपदिरुहिप्रकृतेरनात्सपूर्वपदादुपसंख्यानं कर्त्तव्यं॥ विशि॥ गेहानुप्रवेशनीयं॥ प्रपूरि॥ प्रपापूरणीयं॥ प्रपापदि
गोप्रपदनीयं॥ अश्वप्रपदनीयं॥ परिरुहि॥ प्रासादारोहणीयं॥ स्वर्गादिभ्यो यत्॥ स्वर्गादिभ्यो यत्प्रयोजनं भवति॥ स्वर्ग्यं॥ धन्यं यशस्यं॥ आयुष्यं॥ पुण्याहवा
चनादिभ्यो लुग्वक्तव्यः॥ पुण्याहवाचनं शांतिवाचनं स्वस्तिवाचनं॥ ऐकागारिकट्॥ एकागारान्निपातनानर्थक्यं ठञ्प्रकरणात्॥ एकागारान्निपातनमनर्थ
कं किंकारणं ठञ्प्रकरणात्॥ ठञ्प्रकृतः सोऽनुवर्त्तिष्यते॥ इदं तर्हि प्रयोजनं॥ चौर इति॥ वक्ष्यामीति इहमैकागारं प्रयोजनमस्य भिक्षोरिति॥ यद्ये
तावत्प्रयोजनं स्यादैकागारिको भिक्षुरित्येव ब्रूयात्॥ ॥ ॥ ॥

तुग्रहमनेकपुरुषाधिष्ठानात् मोषितुमशक्यम्॥ ठञ्प्रकृत इति प्राग्वते ष्ठञि प्रसक्ते ठञ्प्रत्ययः प्रयोजनमित्यत्रानुवर्त्तिष्यते॥ इदं तर्हीति नियमार्थमेतदित्यर्थः॥ भि
क्षोरिति॥ एकमेव यो भिक्षां गृह्णीते न द्वितीयां तस्याभिधानं मा भूदित्यर्थः॥ यद्येतावदिति अनभिधानात् भिक्षो नेम भविष्यतीति नियमार्थमप्येतन्नोपयुज्यत इति
भावः नच त्रित्वस्वरनिरसार्थं निपातनं त्रित्वस्वरस्येष्टत्वात् एतच्च भाष्यवार्त्तिकाभ्यां निराकरणात् ज्ञायते॥ ॥ ॥

=निपातनमिति॰ टकारस्य कार्याभावात् [illegible] निपातनात्॥

आकालि। आकालादिति। आकालशब्दात् प्रत्ययान्तेन समर्थकं प्रकृतिमुच्चार्य प्रकृतस्य ठञ् विधेय इत्यर्थः। तत्रावन्तः कालो यस्यासावाकालो न वर्तमानकालस्यावृत्तिः संभवती समर्थो भवति उत्पत्तिकालेन समानो यस्य विनाशकालः एवं हि तस्योत्पत्तिकालो विनाशकालोऽवन्तो भवति यदि य एवोत्पत्तिकालः स एव विनाशकालः न चोत्पत्तिविनाशयोरेककालत्वं संभवति निरन्तरविनाशकालप्रतीतिर्भवति निरन्तरो हि कालोऽभेदाग्रहणात् स एव काल इति लोके व्यवह्रियते। ततः स्वार्थे ठञ् विधेयः आद्यन्तवचने विषय इति भावः भाष्यकारो निपातनं समर्थयितुमाह। इदं तर्हीति। निपातनेन हि समानकालशब्दः प्रकृतित्वेनाश्रीयते तस्य चाकाल आदेशो निपात्यते। समानशब्द एक

आकालिकडाद्यन्तवचने। आकालान्निपातनानर्थक्यं ठञ्प्रकरणात्। आकालान्निपातनानर्थक्यं किं कारणं ठञ्प्रकरणात्। ठञ्प्रकृतः सोऽनुवर्तिष्यते। इदं तर्हि प्रयोजनं। एतस्मिन्विशेषे निपातनं करिष्यामि। समानकालस्याद्यन्तविवक्षायामिति। आकालाट्ठंश्च वक्तव्यः। आकालिकी आकालिका। तेन तुल्यं। इदमप्युक्तं वर्त्तते। किमत्राप्युक्तं। यत्तृतीयासमर्थं क्रिया चेत्सा भवतीत्युच्यते॥ ॥ ॥

=निपातनप्रसंगे तु तत्समुच्चयार्थश्चकारः। निपातनं चकर्त्तव्य

वाची एककालावाद्यन्तौ यस्यासावाकालिकः आदिर्जन्म अन्तो विनाशः। जन्मविनाशयोश्चाव्यवहितकालत्वात् एककालत्वं विधौ लयन्ययेः क्लेशेन प्रतीयत इति निपातनाश्रयणं उक्तं च धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च। अनुबन्धविकाराणां रूढ्यर्थं च निपातनमिति। अन्ये वर्षादिष्वप्याकालिकशब्दमिच्छन्ति यस्मिन्नेव काले मध्याह्नादावुत्पत्तिर्वर्षाणां तस्मिन्नेव द्वितीयादिदिवसे संबंधिनि विनाशः तान्याकालिकानि। आकालाट्ठंश्चेति आकालशब्दव्युत्पत्तिः प्रदर्शिता ततः स्वार्थे ठन् प्रत्ययस्तु काराट्ठन् अर्थस्य पूर्वं प्रदर्शितः॥ तेन इदमप्युक्तमिति सूत्रोपात्तं वतिरिदमापरामृश्यते यत्तृतीयासमर्थमिति तेन तुल्यमित्यनेन क्रमेण प्रकृतिप्रत्ययार्थौ निर्दिष्टौ तत्र क्रियाग्रहणं प्रकृतस्यैव शास्यस्याक्रमव्यतिक्रमे हेत्वभावाद्विशेषणं स्यात् यद्यनुक्तं संभवात् उक्तमित्यर्थः। ननु तेनेत्यस्य वृत्तिविभक्तिकेन क्रियाग्रहणेन कथं संबंधः

= वर्षादीनां · २=

=अध्याहारादिसापेक्षत्वात् · १=

=तथा चेति पंच कृत्वः पाक इति न भवति पंच पाकाः इत्येव भवति यथा पंच घटाः इति न भवति न तु पंच कृत्वो घटा इति २ = प्रसिद्धेति न हि देवदत्तयज्ञदत्तयोः साधर्म्यप्रयोजकं गुणप्रसिद्धिः १५ = कृत्वोऽर्थेति संख्याया इति ... क्रियायाम् एव भवतीति क्रियाया ग्रहणं साधर्म्ये

पत्रा १

श्रयत इति विशेषणानां चाजातेरिति वचनात्तत्र हि विशेषणशब्देन परोपकारयोग्यत्वात्‌ शेषभूताः शुक्लादयो गुणा गृह्यन्ते॥ अथवा क्रियेति अतिशाय्यो तिशायन

एवमपि लिंगवचनानि न सिध्यन्ति। शुक्लतरं शुक्लतरा॥ शुक्लतरः शुक्लतरौ शुक्लतरा इति। आश्रयतो लिंगवचनानि भवन्ति। गुण-
वचनानां हि शब्दानामाश्रयतो लिंगवचनानि भवन्ति। तद्यथा शुक्लं वस्त्रं शुक्ला शाटी। शुक्लः कंबलः शुक्लौ कंबलौ शुक्लाः कंबला इति।
यदसौ द्रव्यं श्रितो भवति गुणस्तस्य यल्लिंगं वचनं च तद्गुणस्यापि भविष्यति॥ अथवा क्रियाभिधीयते। एवमपि लिंगवचनानि न सि-
ध्यन्ति आश्रयतो लिंगवचनानि भविष्यन्ति॥ एवमपि द्विवचनं प्राप्नोति यद्धि अतिशेते यच्च अतिशेष्यते उभौ तौ तस्याश्रयौ भव-
तः। नैष दोषः। कथं शेतिरकर्मकः॥ अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्ति। कर्मोपदिष्टा विधयः कर्मस्था भावकानां कर्म-
स्था क्रियाणां वा भवन्ति। कर्तृकस्थभावकश्च शेतिः॥ अथ यद्येवं द्वितीयां तावदुत्पत्तिः प्रथमां तावत्स्वार्थिकः अथापि गुणोऽभिधीयते।
अथापि क्रिया। किं गतमेतदियता सूत्रेण॥ आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्तव्यं। गतमित्याह। कथं यदा तावद्द्वितीयां तावदुत्प-
न्नमिति भावेत्युद्विधानात्‌॥ आश्रयौ भवत इति उभयोर्निर्वर्तकत्वादिति भावः॥ अकर्मका अपीति अर्थान्तरवृत्तित्वात्कर्मोपदिष्टा इति अतिशयि क्रियाकर्तृद्वैर्ध्यं वुसमवेतान-
नुकर्मणीति कर्माश्रयलिंगसंख्याभावस्तु न भवति कर्मोपदिष्टा इति द्विवचनमिह कर्मोपदिष्टो विधिः कर्माश्रितस्य चोदितत्वात्‌। आश्रयतो लिंगवचनानि सत्त्वसमवाय्या-
(१ अप्रयोगस्तेन तु निर्वर्तक इत्यर्थः॥ ॥ ॥

ग्रं॰ प्रथमानामाधिक्यं ॥०॥

भा०कै०५ स्तुट्म भविष्यतीति कर्तृसाधनः। कः प्रयोज्यार्थ इति। अचेतनत्वात् गुणानां प्रयोजकतानुपपत्तिं मन्यते गुणगुणिनमिति। अस्माभिः प्रकर्षे त्वमतिशेष्येति न तत्सामर्थ्यो
७७ चरणलक्षणश्चाचेतनानामपि प्रयोजकव्यापार इति कारकप्रकरणे प्रतिपादितं। कः पुनरिति। शोनेर नेकार्थत्वात् प्रश्नः। यो यत्रेति स्वस्थानार्थः शेतेर्ण्यन्ताजल्ला
शायदस्तत्रेति भावः॥ गुणगुणिनाविति अवतिष्ठन्त इत्यर्थः। ताननुगुणाननुगुणपति शाययन्ति अतिशाये नावस्थापयतीत्यर्थः॥ पूर्वं गुणानां प्रयोजकत्वमुक्तं पश्चा

=करणेल्युट्=१ =भावेल्युट्=१

तदाकृतस त्सुटो बहुलमित्येवमत्र ल्युड् भविष्यति। यदा गुणोऽभिधीयते। तदा न्याय्य सिद्धमेव। यदापि क्रिया तदापि न्याय्य सिद्धमेव। अथवा अतिशायपयतीत्यतिशायनं। कः प्रयोज्यार्थः॥ गुणगुणिनं प्रयोजयंति। गुणी वा गुणान्प्रयोजयति। कः पुनरिह शेत्यर्थः॥ इह यो यत्र भवति शेते। सोऽत्र गुणाश्च गुणिनि शेरते। शेत्यर्थः कारितार्थो वा निर्देशोऽयं समीक्षितः। शेत्यर्थे नास्ति वक्तव्यं कारितार्थं ब्रवीमि। गुणी वा गुणसंयोगाद् गुणो वा गुणिनाय दि। अभिव्यज्येत संयोगात्कारितार्थो भविष्यति॥ इह अस्यापि सूक्ष्माणि वस्त्राणि वस्त्राणीति। परत्वादातिशायिकः प्राप्नोति॥ आतिशायने बहुव्रीहावुक्तं। किमुक्तं। पूर्वपदातिशाये

×अस्यातिसूक्ष्माणि×१

आतिशायिकाद्बहुव्रीहिः सूक्ष्मवस्त्रतराद्यर्थ इति॥ ॥

गुणिनः शेत्यर्थ इति प्रकृत्यर्थो णिजर्थोऽपि वा अत्र गम्यत इत्यर्थः॥ शेत्यर्थे नास्तीति न तत्प्रसिद्धत्वात् गुणी वेति॥ गुणसंबंधाद् गुणवानतिशेते गुणिसंबंधाद् गुणो वा अभिव्यज्येते
तिप्रकृष्टत्वेनेति भावः। कारितार्थ इति गुणो गुणिनमतिशाययति गुणेऽपि गुणामिसस्तिणर्थोपपत्तिः॥ परत्वादिति सूक्ष्मतरवस्त्र इति प्राप्नोति सूक्ष्मवस्त्रतर इति चेष्यते प्रकर्ष एम०
स्यान्यपदार्थप्रतिविशेषणत्वस्य च युगपद्विवक्षायां विप्रतिषेधोपपत्तिः आतिशायिकादिति पूर्वविप्रतिषेधेनेति भावः॥ ॥ ॥ ७७

उत्तरपदातिशय इति परविप्रतिषेधेन तत्र स्वरे विशेषस्तरबन्ते न समासे बहोर्नञ्वदुत्तरपदभूम्नीति बहुशब्दाद्गरशब्दोन्तोदात्तो भवति बहुव्रीहेस्तरपि सति तरपः पित्वादनु
दात्तत्वान्मध्योदात्तत्वप्रसंगस्तथा कपि विशेषो बहुपाद्यतरक इति तरबन्ते न समासे भवति बहुव्रीहेस्तु तरपि बहुपाद्यकतर इति स्यात् यदा तु तत्रैव पूर्वपदार्थातिशयस्तदा ब
हुव्रीहौ कृते तेन तरब्भवेदिति तद्वः प्रकर्षापकर्षयुक्तानीति अवयवधर्मेण समुदायस्य व्यपदेशस्तत्र प्रथममध्यमयोः प्रकर्षयुक्तं मध्यमं पूर्वापेक्षया प्रकर्षयुक्तं मंसापेक्षया पकर्षयु

उत्तरपदातिशयेऽप्यातिशायिको बहुव्रीहेर्बहुपाद्यतराद्यर्थ इति। इह त्रीणि शुक्लानि वस्त्राणि प्रकर्षापकर्षयुक्तानि तत्र पूर्वमपेक्ष्य उत्तरे द्वे
तरबन्ते। तत्र द्वयोस्तरबन्तयोरेकस्मात् शुक्लतर इति शब्दादुत्पत्तिः प्राप्नोति। शुक्लशब्दादेव प्यते। शुक्लतरस्य शुक्लभावात्प्रकृतेः प्रत्ययविज्ञा
नं। शुक्लतरशब्दे शुक्लोऽस्तीति तस्मादुत्पत्तिर्भविष्यति॥ नैतद्विवदामहे शुक्लतरशब्दे शुक्लोऽस्ति नास्तीति॥ किं तर्हि शुक्लतरशब्दोऽप्य
स्ति। तत उत्पत्तिः प्राप्नोति॥ तदन्ताच्च स्वार्थे छन्दसि दर्शनं श्रेष्ठतमायेति। तदन्तात् आतिशायिकान्तात्स्वार्थे छन्दसि आतिशायिको दृश्य
ते देवो वः सविता प्रार्पयितु श्रेष्ठतमाय कर्मणे॥ श्री ॥७॥

=तनुश्रेष्ठतमायेत्यातिशायिकादातिशायिको दृश्यत एवेत्यनन्तरः तदन्ताच्चेति॥ ९=

[redacted] युक्तं मंसं तु प्रकर्षयुक्तमेवेति योज्यं। तत्रेति। पूर्वापेक्षया द्वयोरपि प्रकृष्टत्वाच्छुक्लतरत्वं तयोस्त्वेकतरस्यान्यतरापेक्षया प्रकर्षविवक्षायां तरबन्तात्तरबुत्प
त्तिप्रसंगः॥ शुक्लतरस्येति। न्यूनमध्यमोत्कृष्टानां सर्वेषां शौक्ल्यसंभवात् शुक्लव्यपदेशाच्छुक्लशब्दादेव तरबुत्पत्त इत्यर्थः॥ शुक्लतरशब्द इति शुक्लतरः शब्दो वाच
को यस्यार्थस्य तस्मिन्नर्थे शुक्लशब्दो वाचकत्वेन नास्तीत्यर्थः॥ उत्पत्तिः प्राप्नोतीति॥ अनिष्टमपि प्राप्नोति स त्वामपीष्टसिद्धावित्यर्थः॥ श्रेष्ठतमायेति श्रेष्ठायेत्यर्थः॥०

भा०कै०५
७८

मध्यमादिति॥ मध्यमवाचिनः शुक्लादेरभिधेये प्रत्ययोवक्तव्यः शुक्लमतिशेते शुक्लतर इति। अनेनचवक्तव्येनतत्कौण्डिन्यन्यायेनततीयशुक्लवाचिनः शुक्लत
रशब्दादुत्पत्तिर्बाध्यते मध्यमस्य शुक्लः पूर्वापेक्षया शुक्लतरो भवतितत्तीयापेक्षयातु न्यूनलाघुल्ल एव भवतिन्नतु शुक्लतर इति शुक्लशब्दादेव मध्यमशुक्लवा
चिनः प्रत्ययोवक्तव्य इत्यर्थः॥ नचन्यूनः प्रवर्त्तेत इति स्वगतप्रकर्षापेक्षयांतद्धितोत्पत्ता विसर्पः॥ ततश्च पूर्वमतद्धितांतएव शुक्लशब्दस्तत्तीये शुक्लेऽभिधेयेप्र
त्ययमुत्पादयतिलुप्स्यविष्यतीतिगतार्थत्वात्प्रयोगएवलुक्।एकेनैवतरम्मध्यमशुक्लापेक्षत्तत्तीयप्रकर्षस्यप्रतिपादनात्॥ नचेति शुक्लतरतरशब्दस्यप्रयो
पा०आघ१

एवंतर्हिमध्यमात्शुक्लशब्दात्पूर्वपरापेक्षा उत्पत्तिर्वक्तव्या॥ मध्यमस्य शुक्लशब्दः पूर्वमपेक्ष्यप्रकृष्टः परमपेक्ष्यन्यूनः नचन्यूनःप्र
वर्त्तते। अथवाउत्पद्यतांलुप्स्यविष्यति। वाचकेनखल्वप्युत्पत्तव्यं॥ नचशुक्लतरशब्दाडुत्पद्यमानोवाचकः स्यात्नखल्वपिबहूनांप्रक
र्षेतरयाभवितव्यं॥ केनतर्हितमपा। पूर्वेणप्रवर्द्धमानोयउत्तरोलभतेसितः परस्मिन्न्यूनतामेतिनचन्यूनःप्रवर्त्तते। अपेक्ष्यमध्यमःपू
र्वमाधिक्यंलभतेसितः परस्मिन्न्यूनतामेतियथामात्सः स्थितेनापेअन्तवापिनरत्तस्मान्नापशब्दोभविष्यतिवाचकश्चेत्प्रयोऽऊखोवाचकश्चे
१त्प्रयुज्यतां॥ ॥ ॥

गामावाद्वाचकत्वं। नखल्वपीति। यदित्ता बहूनामप्यन्यतमस्यप्रकर्षोविवक्ष्यतेतदाशुक्लतममितिभाव्यंनतुशुक्लतरमित्यर्थ पूर्वमनपेक्ष्यद्वयोरन्यतरस्यप्रकर्षेविव
क्षात्तदापूर्वानपेक्षायांमध्यमंशुक्लमेवभवतिनतुशुक्लतरमितिशुक्लशब्दादेवोत्पत्तिः सिद्धा शुक्लतर इतिनकश्चिद्दोषः पूर्वोक्तार्थसंग्रहश्लोकाः। पूर्वेणेतिसितः शुक्लः
पूर्वेणप्रवर्द्धमानस्तदपेक्षयोत्तरःप्रकर्षलभतेतत्तीयापेक्षयातुन्यूनएवेत्यर्थः। अपेक्ष्येतिपूर्वेणसमानार्थोदृष्टांतोपादानाय तुपुनरुक्तः नायशब्दइतिगतार्थ एम०
त्वात्लुप्स्याघ्वाचकश्चेत्प्रयोक्तव्यइतिलम्मन्यसेतदाशुक्लतरमितिपरिवाचकस्ततःप्रयुज्यतां नतुवाचकस्तस्मान्नप्रयोक्तव्यइत्यर्थः॥ ॥ ७८

तर१

द्विवचाद्विवचनंच विभज्यं च द्विवचनविभज्यं निपातनात् भजेः विण्वोधात्मसयोर्द्विवचनविभज्यं चतदुपपदं चेति कर्मधारयः तस्मिन्नुपपदे सति ष्ठेतिप्रत्ययौ भवतः। तन्नोपपदं विग्रहवाक्य एव प्रयुज्यते। वृत्तौ तु गतार्थत्वान्न प्रयुज्यते एवं चोपपदद्वयग्रहणं विस्पष्टार्थं। तन्नेदं न सिध्यतीति। पारिभाषिक द्विवचनाश्रयः दूरे ह्वेः प
नौ भवतः तच्चोपपदं विग्रहवाक्य एव प्रयुज्यते। वृत्तौ तु गतार्थत्वान्नाव श्यं प्रयुज्यते एवं चोपपदद्वयग्रहणं विस्पष्टार्थं। तच्चेदं न सिध्यतीति। पारिभाषिकद्विवचनाश्रयः पूर्वोः प
क्षः अर्थाश्रयस्तूत्तरपक्षः अस्मा कं चेति। अस्मदो द्वयोश्चेति एकस्मिन्बहुवद्भावः यदि पुनरिति पूर्वोक्ते पूर्वाह्णे राशौ पुक्ते द्विराशिद्वयापेक्षस्य नकं चिदर्थद्वयापेक्षस्य द्व्यर्थ
स्य विद्यमानत्वात्मसयः सिद्ध इति भावः इहापीति। सांकाश्यक पाटलिपुत्रकराशिद्वयसंभवात्। सांकाश्यकानामिति अपत्रापि राशिद्वयस्य सद्भावात्तरं स्यात् सांकाश्य
=दंतोष्ठयुलादौ·२= =अस्माकंत्वदेवदत्तस्य सादौ·२=
द्विवचनविभज्यो। द्विवचन इत्युच्यते। तन्नेदं न सिध्यति॥ दंतोष्ठस्य दंताः स्निग्धतराः॥ पाणिपादस्य पादौ सुकुमारतरौ अस्माकं च देवदत्तस्य च देव
दत्तो भिरूपतर इति। यदि पुनर्द्व्यर्थोपपद इत्युच्यते। तत्रायमर्थः॥ विभज्योपपदग्रहणं न कर्त्तव्यं भवति। इहापि सांकाश्यकेभ्यः पाटलिपुत्र
का अभिरूपतरा इति द्व्यर्थोपपद इत्येव सिद्धं नैवं जातीयिकाद्व्यर्थता शक्या विज्ञातुं इहापि प्रसज्येत। सांकाश्यकानां पाटलिकाणां च पाटलिपु
त्रका अभिरूपतमा इति॥ अवश्यं खल्वपि विभज्योपपदग्रहणं कर्त्तव्यं यो हि बहूनां विभागस्तदर्थं। सांकाश्यकेभ्यश्च पाटलिपुत्रेभ्यश्च
्र माथुरा अभिरूपतरा इति। तन्नाहि द्व्यर्थोपपद इति वक्तव्यं॥ ॥ ॥
=उक्तावयवभेदस्तर्पः॥१=
कावयवः समुदायः सांकाश्यकशब्देनोच्यते॥ पाटलिपुत्रकावयवश्च पाटलिपुत्रकशब्देनैवं निर्धारणमुपपद्यते। बहूनां विभाग इति बहूनां राशीनां मध्यादेकस्य राशे
र्यत्र विभागः तत्र राशित्रयादि सद्भावात्तरम्न स्यात्॥ तन्नाहीति। ननु नैवं जातीयिकाद्व्यर्थे तेसादिनाति प्रसंगोद्भावनेनास्य पक्षस्य दूषितत्वात्कथं पुनरंगीकरणं नैष दोषः इह राशि
द्वयापेक्षां द्व्यर्थतामाश्रित्याचार्यदेशीयेन यदि पुनरित्याद्युक्तं तत्रायमर्थ इति च तत आचार्येणनैवंजातीयिके तिराशिद्वयापेक्षा द्व्यर्थता दूषिता ततोन्या द्व्यर्थताचार्य स्या
्र भिमते ज्ञात्वा शिष्य आह। तन्नाहीति॥ ॥ ॥

भा० कै० ५ आचार्य आह॥ नवकृत्वमिति। इयमाचार्यस्य द्व्यर्थताभिमता॥ इह रक्तो दृष्टस्य पाणिपादस्येति निरोहितावयवभेदः समासार्थः॥ तत्रैतस्यां व्यावभेदे कृत्वसंख्योपादानापि त्वाद्व्यर्थि
७९ पदस्य परिसमाप्तभेदांगीकृताभेदलक्षणौ कृत्वसंख्ये दंतोष्टलक्षणार्थे द्वयाश्रया द्व्यतातिपदार्थितरेतरयोगं द्वंद्व तत्रावयवकार्थभेदसद्भावाद्व्यर्थता नास्तीति तत्र मध्यवृत्ति
लक्षणस्ययोधानां श्लक्ष्णाः स्निग्धतमा इति। अस्माकं च देवदत्तस्य चेत्याद्यपत्ये द्वयसद्भावात् तिद्व्यर्थत्वं सांकाश्यकानां च पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपत
मा इत्यपरिसमाप्तभेदाः समूहिनः शब्देन प्रत्याय्यंते तेन च गुणशिद्वयापेक्षा द्व्यर्थ [redacted] ता शब्देन प्रतिपादिता गुणशि शब्दस्य प्रयोगादिति द्व्यर्थत्वाभावात्तत्र भावः
अथात्र यतश्च निर्द्धारणमिति कथं षष्ठी यावता पंचमी विभक्त इति पंचम्यातदपवादेन भाव्यं नैष दोषः सर्वत्रैव निर्द्धारणे विभागो स्ति विभक्त इत्यग्रहणासामर्थ्याद्यत्र

नवकृत्वः॥ नेदं पारिभाषिकस्य द्विवचनस्य ग्रहणं॥ किं तर्हि अन्वर्थस्य ग्रहणं। उच्यत इति वचनं द्वयोरर्थयोर्वचनं द्विवचनमि
ति॥ एवमपि तरबीप्सनोरेकद्रव्यस्योत्कर्षापकर्षयोरुपसंख्यानं। तरबीप्सुनोरेकद्रव्यस्य उत्कर्षापकर्षयोरुपसंख्यानं कर्त्तव्यं॥

विभाग एव शब्देन प्रतिपाद्यते स एव पंचम्या विषयः [redacted] स एव च विभज्योपपदनिमित्तस्य प्रत्ययस्य माथुराः पाटलिपुत्रकेभ्यः आढ्यतरा इति समुदायशब्द
प्रयोगे तु गवां कृष्णा संपन्नक्षीरतमेत्येवमादौ विभागाविभागसंभवान्न पंचमी नापि तरप्तमपयोर्निर्द्धारणाश्रये तु षष्ठीसप्तम्यौ भवतो यस्मान्निर्द्धार्यते यच्चैकदेशो नि
र्द्धार्यते यश्च निर्द्धारहेतुरेतत्त्रयसन्निधाने निर्धारणं भवतीति तत्रैव षष्ठीसमास प्रतिषेधः इह तु नागानामुत्तमो नाग इति त्रयसन्निधानाभावात्संबंधसामान्ये ष
ष्ठीति समासो भवत्येव सांकाश्यकानां पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपतमा इत्यत्रापि शब्देन समुदायस्य प्रतिपादनाद्विभज्यमानस्य द्विरूपादाना
द्विभागाविभागसद्भावाद्विभागविषयत्वकार्याभावः प्रतियोग्यपेक्षत्वात्प्रकर्षस्य विकर्षं आक्षिप्ते विभज्यग्रहणादिहाप्यवधारणमाश्रीयते। तेन समुदायशब्दोच्चा एम०
रण्यमाणो विभज्योपपदनिमित्तप्रत्ययाप्रसंगः॥ ॥ ॥ ७९

प्रकृतमप्यगानि ति॥ पाटवस्यातिशये ऽपि प्रतियोग्यपेक्षत्वात् प्रकर्षस्य स एवायमिति प्रत्यभिज्ञानात् गुणिन एकत्वात्तस्यैव प्रतियोगित्वायोगात्प्रकर्षेण सह प्रसंगः सि
द्धं त्विति॥ यद्यपि शब्देन गुणी प्राधान्येनोच्यते तथापि गुणाश्रयप्रकर्षनिमित्तत्वात् प्रत्यययोस्तत्र तत्प्रतिगुणस्य प्राधान्यमाश्रित्य गुणप्रधानत्वादिरुच्यते॥
तत्र गुणभेदे न गुणिनो भेदारोपादुपपन्नो भेदाश्रयप्रकर्षनिमित्तः प्रत्ययः। अजादी॥ नियमार्थ इति। अन्यथा प्रकर्षे योर्विधानाद प्रकर्षे विधि
: स्यादिति सिद्धे विधिरिति सिद्धत्वादतिशायनस्यानुवर्तनात्तेषु पुनर्विधानं नियमार्थमिति सर्वथा प्रशस्यस्य एवमपीति। अन्यथा तरतमयोरादेशविधानं स्यादिति न त्वाप
परिडुवान्पटुः आसीत्पटुतरश्चैष मद्य इति सिद्धं तु नुमणप्रधानत्वात्सिद्धमेतत्कथं गुणप्रधानत्वाद्गुणप्रधानो यं निर्देशः क्रियते गुणांतरयोगा
च्चाम्यत्वं भवति। तद्यथा तमेव गुणांतरयुक्तं वक्ता भवति॥ अन्यो भवान्वृत्त इति। अजादी गुणवचनादेव। एवकारः किमर्थो नियमार्थः। नैतदस्ति
प्रयोजनं सिद्धे विधिरारभ्यमाणोऽन्तरेणैवकारं नियमार्थो भविष्यति। इष्टतोवधारणार्थस्तर्हि। यथैवं विज्ञायते। अजादी गुणवचनादेवेति। मैवं विज्ञा
यि। अजादी एव गुणवचनादिति। किं च स्यात्। न व्यंजनादी गुणवचनात्स्याताम्। प्रशस्यस्य श्रः इदमयुक्तं वर्तते। मत्वा युक्तं अजादी गुणवचना
देवेत्युक्तं अगुणवचनानामपि अजाद्योः आदेशा उच्यंते। नैष दोषः एतदेव ज्ञापयति॥ भवत एते प्रत्ययाः अगुणवचनेभ्योपि अजादी इति॥ यदयं
अजाद्योः परत आदेशान् शास्ति। एवमपि तयोरिति वक्तव्यं स्यात्॥ तयोः परत इति॥ यदि पुनरयं विधिर्ज्ञायते नैवं शक्यं॥ व्यंजनादी न हि स्याताम्॥
उपाधीनां च संकरः स्यात् पुनर्विधानादजाद्योः ननु चैते विशेषा अनुवर्त्स्यन्ते। यद्यप्येते अनुवर्त्स्यन्ते व्यंजनादी तर्हि न स्याताम्॥ ॥ ०
कं स्यादजादिभावस्य परिपुनरिति। अजादी इत्यत्रानुवृत्ते प्रशस्यशब्दादजादी भवतः आदेशाश्चेत्येवं व्याख्यानात् व्यंजनादी इति विशेषविहिताभ्यामजादिभ्यां बाध
नात्॥ ज्ञापकत्वे तु नियमाप्रवृत्तिज्ञापनात्स्वशास्त्रेणैवाजाद्योर्विधानाद्व्यंजनाद्योर्वाधस्याप्रसंगः द्विवचनविभज्योपपदे ईयसुन्न प्रत्ययेष्विति सुपाधिसंकरो न भवति॥
ननु चैत इति। अतिशायने इष्ठो द्विवचनविभज्योपपदे ईयसुन्नित्यनुवर्तिष्यत इत्यर्थः॥ व्यंजनादी तर्हीति। यदि चतरम्प् मपाव अनुवर्त्स्ये पातां तदा तयोरपि आदेशाः स्युः त

भा०कै०५
८०
आचार्यप्रवृत्तिरिति नियमाप्रवृत्तिज्ञापनद्वारेणाऽजादिभावो ज्ञाप्यते ननु साक्षादन्यथा पुनरपि अंजनाद्योर्बाधः स्यात् अकृतमिति अनाद्योरिति सप्तम्यंतं न प्रकृतं यत्तु प्रकृतमजादी इति ननु तदेवानुसंबध्यत इति प्रश्नः अर्थादिति सामर्थ्यादित्यर्थः॥ ननु चाजादी इति यथाश्रुत विभक्तिसंबंधे अजादिविधानार्थे संभवति कथं विपरिणामः शंकामाशयितुं नेष्टो षः प्रशंस्येति षष्ठीश्रवणात् स्थान्यादेशभावागमादेशस्य विधीयमानत्वात् प्रधान्यं प्रतीयते तत्राजा
स्म

एवं तर्हि आचार्यप्रवृत्तिर्ज्ञापयति भवत एतेभ्योऽगुणवचनेभ्यो प्यजादी इति॥ यद्यमजाद्योरादेशः शास्ति। ननु चोक्तं तयोरिति वक्तव्यमिति। न वक्तव्यं। प्रकृतमजादिग्रहणमनुवर्त्तते॥ क प्रकृतं॥ अजादी गुणवचनादेवेति। तद्वै प्रथमानिर्दिष्टं सप्तमीनिर्दिष्टेन चेहार्थः॥ अर्थाद्विभक्तिविपरि णामो भविष्यति। तद्यथा। उच्चानि देवदत्तस्य गृहाणि आमंत्रयस्वैनं देवदत्तमिति गम्यते। देवदत्तस्य गावोऽश्वा हिरण्यं आढ्यो वैधवेयः देवदत्त इति गम्यते। पुरस्तात्षष्ठीनिर्दिष्टं सदर्थात्प्रथमानिर्दिष्टं द्वितीया निर्दिष्टं च भवति॥ एवमिहापि पुर
॥ स्तात्प्रथमानिर्दिष्टं सदर्थात्सप्तमीनिर्दिष्टं भविष्यति॥ ॥ ॥

= ननु अजादी इति प्रथमांतस्य प्रातिपदिकार्थ एवार्थो ननु गुणवचनादिति शिष्टस्तु किं तत्पूर्वशक्तिलाभपूर्वकश = ...
= कांत ... विपरिणाम ... प्रातिपदिकार्थ एवे ति २ =
= ननु प्रथमायाः सप्तमी रूपेण विपरिणामो ... विपरिणामो न ... विभक्तीति १ =

दीइस नुवर्त्तनादादेशविधौ प्रसंयोगुणाभावः ततः सामर्थ्याद्विभक्तिविपरिणामः विभक्तिशब्देन विभक्त्यर्थ उच्यते तस्य पूर्वशक्तिसागेन शक्त्यंतरोपजननेन विपरिणा मव्यवहारः प्रातिपदिकार्थ एव हि नाना प्रक्रियो गात् कर्म्मादिशब्दवाच्य इति सएव विशिष्टशक्तियुक्तो विभक्त्यंतरवाच्यः अथवा तल्लिके षिभेदे शब्दस्य सारूप्या त्तत्ताद्रूप्यवसायाश्रयेण विभक्तिमस्य सागोपादानाभ्यां प्रातिपदिकस्य विपरिणामव्यवहारो वसीयते विभक्तेस्तूपचरितो विपरिणामव्यवहारः नहि प्रथमायाः
॥ सप्तमीरूपेण विपरिणामसंभवः॥ ॥ ॥

एम०
८०

= सएवेति एवं च तदिति ... सकल ... भागपूर्वकं यत्किंचित् किंचिद्विशिष्टेन विभक्त्यंतरवाच्यः प्रथमातिरिक्त विभक्त्यंतरवाच्य इत्यर्थः एवं च प्रकृते औपश्लेषिकाधिकरणाश्रये कृत्यतेन बोधाद्विपरिणामव्यवहार इति भावः २ = विपरीति एवं च प्रथमा विशिष्ट प्रातिप...

प्रशंसा॥ इह प्रत्ययस्य विधीयमानतया प्राधान्यात्तदंगत्वाच्च प्रकृतेः प्रधानेन प्रशंसायाः संबंधस्य न्याय्यत्वात्तस्याः प्रत्ययार्थत्वं मत्वाह। स्त्रीलिंगेनायमिति तत्तस्य
पटोः प्रशंसा पटुरूपेति प्राप्नोति। अयं पटुरूपो देवदत्त इति सामानाधिकरण्यप्रसंगः कस्मान्न चोदितः तत्र केचिदाहुः। दोषोपलक्षणायेतदुक्तं अन्ये त्वाहुः सोय
मित्यभेदविवक्षायां सामानाधिकरण्यं भविष्यति भेदविवक्षा तु तथा लक्षणाप्रयोगाभावान्न क्रियते यद्येवं गुणवचनानामाश्रयतो लिंगवचनानि भवंती
त्यतिशायनप्रत्ययांतवदभिमतलिंगवचनयोगाद्दोषाभावः अन्ये त्वाहुः प्रकृत्यर्थविशेषणपक्षस्योभयानुग्रहात्न्याय्यत्वादयं परिहारो भाष्यकारेणाश्रि

=फलेहेतौ पंचमी.१= =वाचकद्योतकताभ्यां प्रकृतिप्रत्ययोर्द्वयोरप्यनुग्रहात्.१=

प्रशंसायां रूपपा स्त्रीलिंगेनायं निर्देशः क्रियते। एकवचनांतेन चा तेन स्त्रीलिंगादेर्वोत्पत्तिः स्यात् एकवचनांताच्च पुंनपुंसकलिंगाद्विव
चनबहुवचनांताच्च न स्यात्। नैष दोषः। नायं प्रत्ययार्थः। किं तर्हि प्रकृत्यर्थविशेषणमेतत्। प्रशंसायां यत्प्रातिपदिकं वर्त्तते तस्माद्रूपब्
भवति। कस्मिन्नर्थे स्वार्थे इति। स्वार्थिकाश्च प्रकृतितो लिंगवचनान्यनुवर्त्तंते प्रकृतेर्लिंगवचनाभावात्तिङ्. प्रकृतेरभावाच्च वचनं॥ प्र
कृतेर्लिंगवचनभावात्तिङ्. प्रकृते रूपपः अभावो वक्तव्यः। पचतिरूपं पचतोरूपं पचंतिरूपमिति सिद्धं तु क्रियाप्रधानत्वात् सिद्धमेतत्कथं।
१ क्रियाप्रधानमाख्यातं भवति॥ ॥ ॥
तः अन्ये त्वाहुः प्रशंसामात्रे प्रत्ययविधानादंतरंगत्वात्स्त्रीप्रत्ययेन भाव्यं पश्चात्तु सोयमित्यभिसंबंधात्तद्दभिधानेप्यंतरंगः स्त्रीप्रत्ययो न विवर्त्तेप्रत्ययार्थवि
शेषणपक्षे प्रकृत्यर्थविशेषणपक्षे कुमारीरूपेत्यव्यतिरिक्तं वय इति ङी.प् कस्मान्न भवति कुमारशब्दाद्वयस्यन्त्येनङी.पा वयोविशिष्टार्थगतस्य स्त्रीत्वस्य द्योतितत्वा
द्रूपबंतात्स्त्रीत्वमात्रमभिव्यक्तुं टाबेव क्रियते न तु ङी.पेवतदभिव्यक्तमिति टाप्न प्राप्नोति। नैतदस्ति कुमारीरूपइत्युच्यमाने कुटीयादिवद्व्लिंगांतरं प्रतीयेत तस्मात्तद्
रूपमभिव्यक्तुं स्त्री त्वमिति टाबुत्पद्यते अयमेव च परिहार आतिशायिकप्रत्ययानां स्वार्थिकत्वपक्षे कुमारीतरेत्यादावभिधानीयः तिङ्.प्रकृतेरिति तिङ्.प्र

ॐ प्रक्रियाप्रकृतसूत्रपदः तत्पदार्थप्राप्तिः भाष्यकृतेनाकृष्टः ॥१०॥

नादर्श१

मा०कै०५ एकाचक्रियेति। आख्यातशब्दात् क्रियाया भेदस्यानवगमात् क्रियाया एकत्वमुच्यते भवद्भिरास्यत इत्यादौ केवलक्रियावचने द्विवचनबहुवचनात् पचतः पचंती

८१ साद्यौ लकारवाच्यकर्त्तृसमवेतद्वित्वबहुत्वाश्रयो वचनभेद इति ननु ततः क्रियाभेदसिद्धिः एकत्वाच्च क्रियायाः तत्प्रसयांता द्विवचनबहुवचनाभावः द्रव्यप्रधानं नामे

तिप्रसंगे नोक्तं न त्वस्य कश्चित्कृतोपयोगः किं देवदत्तः करोतीति। करोतिरत्र क्रियासामान्यवचनः तत्रविशेषपरिज्ञानाय किंशब्दः क्रियाविशेषणं प्रवर्त्तते क्रि

याविशेषणत्वाच्च किमित्येतद्द्वितीयांतं नपुंसकं च प्र करणाद्विधाच्च क्रिया प्रश्नावगतिः गुणद्रव्यविषयस्यापि प्रश्नस्य संभवात् वाक्यकः किंशब्दः कं वदं करो

=ननु देवदत्तः किं करोतीति कर्मप्रश्नेऽकर्मकक्रियामात्रवाचकेनोत्तरमत आह करोतिरत्रेति २=

एकाचक्रिया द्रव्यप्रधानं नाम। कथं पुनर्ज्ञायते क्रियाप्रधानमाख्यातं भवति। द्रव्यप्रधानं नामेति। यत्क्रियां पृष्टस्तिङा चष्टे किं दे

वदत्तः करोति। पचतीति द्रव्यं पृष्टः कृताचष्टे॥ कतरो देवदत्तः। यः कारको हारक इति॥ ॥ ॥१॥ ॥

=अनुतनमावः उसस्य कर्तोव्यापारः। अस्मिन्पक्षे किं पदं कर्मपरं तच्च प्रकरणादि वशात् क्रियारूपकर्मपरमिति बोध्यं १= उपग्रहः परस्मैपदात्मनेपदनिमित्तविशेषः। २= पाणस्य गोधावतीया सौधावनाप्यर्थस्य ... प्रतिविशेषण ... एकेति एकपदोपात्तकारकापेक्ष

यथाकृत्स्नं तथा किं शाटकं करोरेस घया वा रकमिति केचित्तु क्रियाप्रश्नेप्यमूर्त्तत्वात्तमाववचनं करोतिं मन्यंते किं करोतीति कां क्रियां निर्वर्त्तयतीत्यर्थः॥ तत्राख्यातवृत्तिप्रश्नवाक्ये

प्रकरणाद्विशेषात् क्रियाप्रश्नावगमादाख्यातेनैवोत्तरोपादानात् कालसंख्यासाधनोपग्रहाभिधानेप्याख्यातस्य क्रियाप्रधानत्वावगमः॥ एकपदोपात्तार्थापेक्षं च

क्रियाप्रधानत्वमभिधीयते व्रीहीनवहंतीत्यादौ व्रीहिद्रव्यसंस्कारार्थत्वादवघातस्याप्राधान्ये प्यवघातप्याप्यर्थ व्रीहीणां प्राधान्यं तथापि [redacted] साध्यत्वात्

क्रियायाः शाब्दप्राधान्ये न तु व्रीहीणां साधनत्वात् द्रव्यं पृष्ट इति यद्यपि यः पचतीति तिङंतेनाप्युत्तरं संभवति तथापि सर्वनाम्नाप्रश्ने प्राक्क्रियायाः यस्तोम देवदत्त इ राम०

=कजांतरत्वाह व्रीहीनिति अत्रातुल्यन्याह अथ वेति २= १ सन्निधानात् केवलेनाख्यातेनोत्तरस्यादानादाख्यातस्य साधनमधानत्वा प्रसंगः पदांतरेणाहि द्रव्योपलक्षणाय गुणभावं क्रिया ८१

यदि तर्हीति। क्रियागतसंख्यापेक्षं वचनमेदं मन्यते। नैतानीति। लकारादिवाच्यकर्त्रे कर्मगतसंख्यापेक्षो वचनभेद इत्यर्थः॥ तिङोक्तत्वादिति उक्तार्थो नामप्रयोग इति न्यायात्॥
एकवचनमपीति। पचतिरूपमित्यत्र तिङोक्तत्वादिति भावः समयादिति। परश्चेति नियमान्नकेवला प्रकृतिः प्रयोक्तव्येत्येवं रूपात् द्विवचनबहुवचनान्यपीति। तैर
पि समयस्य परिपालनात् पञ्चपि प्राप्यप्यारेकवचनेनैव समयः पाल्यत इति परिहारसंभवः तथापि परिहारांतरमाह॥ एकवचनमिति। द्व्येकयोर्द्विवचनैकव
चन इत्यत्रैकवचनग्रहणं न कर्तव्यं द्व्योर्द्विवचनमित्येवकर्तव्यं तत्र ङ्याप्प्रातिपदिकात्स्वादयो [redacted] भवंतीति संख्यानिरपेक्षमेकवचनमुत्सर्गो भवति तस्य
=नकर्तव्यमिति। न कियन्मेतिमिक्र्वचनयोरेतं न कर्तव्यं एकवचनमित्येवाप्राप्त प्राप्नुयादिति कर्तव्यमित्युक्तं नास्यैपचति प्रत्ययमितादो सर्वैकवचनमनभिधानावारणीयमिति निवीन विषयकावा: ? दी भिना प्रतुर्वर्तनं गो धावति कत्यस्मिन्प्रयोगः प्रयुमानविशेषकरोप
यदि तर्ह्येकात्क्रिया॥ द्विवचनबहुवचनानि न सिध्यंति॥ पचतः पचंतीति। नैतानि क्रियापेक्षाणि किं तर्हि साधनापेक्षाणि। इहापि तर्हि प्राप्नु
वंति॥ पचति रूपं पचतो रूपं पचंतिरूपमिति॥ तिङोक्तत्वान्न साभिसंबंधस्य न भविष्यति। एकवचनमपि तर्हि न प्राप्नोति समयाद्भविष्यति। द्विव
चनबहुवचनान्यपि तर्हि समयात्प्राप्नुवंति। एवं तर्हि एकवचनमुत्सर्गतः करिष्यते। तस्य द्विबहुर्थ्योर्द्विवचनबहुवचने अपवादौ भविष्य
तः॥ एवमपि नपुंसकत्वं वक्तव्यं॥ न वक्तव्यं। उक्तं वा किमुक्तं लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति॥ वृषलादिभ्य उपसंख्यानं कर्तव्यं। वृषल
रूपं दस्युरूप इति॥ ॥ ॥
द्विबहुत्वयोर्द्विवचनबहुवचनयोरपवादयोर्विधानादेकत्वस्यार्थे अपमेवैकत्वं तिचसंख्याहिते अयाघ्र्य्येचावश्यपस्थितमेकवचनं तस्मादेकवचनेनैवात्र
समयः पाल्यते न तु द्विवचनबहुवचनाभ्यामिति दृष्टा मंतव्यमित्यर्थः॥ लिंगमशिष्यमिति शास्त्रोपदेशेन विना सिद्धिर्लिंगस्य लोकव्यवहारगम्यात्वबला
दिभ्य इति वृषलादीनां निष्ठत्वाद्युत्कृष्टविषयत्वाच्च प्रशंसायाः तत्राभावं मन्यते न्यासांतराश्रयेण सिद्धिमत्वाह॥ ॥ श्री ॥ ॥

भा०कै०५ सिद्धं लिङ्गमिति॥ ननु प्रशंसायामित्येव सिद्धः प्रत्ययः सर्वस्य हि स्वकर्मणः स्वव्यापारेतिशयात् प्रशंसा क्रियते वृषलादीनामप्यसावस्ति। एवं तर्हि यदा निंदा प्रतिपादनाय चोररूप इत्यु
८२ च्यते तदा प्रत्ययाप्रसंगाद्व्यापकं वैस्पष्टयर्हणमेव वक्तव्यं स्यात्तेव पाटवादेर्वैस्पष्टे प्रशंसासत्त्वाभावात् विवक्षावशाच्च येषामेव प्रशंसावाचित्वं तेषामेव निंदावचनत्वे दृ
ष्टप्रत्ययो यथा राक्षसराज इति पौरुषातिशयप्रतिपादने प्रशंसा गम्यते निर्घृणत्वप्रतिपादने तु निंदा। अथ तमबादीनां रूपपश्च को विषयविभागः यावता अतिशा
यनमपि पूजा निंदाविषयं पटुतमः पापीयानिति रूपप्रत्ययोस्तूभयविषयः पटुरूपः चोररूप इति॥ उच्यते॥ अतिशायनं समानप्रतियोग्यपेक्षं वैस्पष्ट्यं
तु तन्निरपेक्षमिति स्पष्ट एव विषयविभागः। अप्ययं पलाण्डुनेत्यत्र दोषगर्हायामपिशब्दः कर्मप्रवचनीयसंज्ञः ईषदस। प्रत्ययानां विधेयत्वात्तया प्राधान्यात् दर्थेत्व

सिद्धं तु प्रकृत्यर्थवैस्पष्ट्यवचनात् सिद्धमेतत् कथं। प्रकृत्यर्थस्य वैस्पष्ट्ये वक्तव्यं। वृषलरूपोयमप्ययं पलाण्डुना सुरां पिबेत्॥ चोररूपोयमप्ययम
क्ष्णोरंजनं हरेत्। दस्युरूपोयमप्ययं धावतो लोहितं पिबेत्॥ ईषदसमाप्तौ॥ ईषदसमाप्तौ क्रियाप्रधानत्वाल्लिंगवचनानुपपत्तिः। ईषदसमाप्तौ
क्रियाप्रधानत्वाल्लिंगवचनयोरनुपपत्तिः। पटुकल्पः पटुकल्पा पटुकल्पौ। पटुकल्पा इति। एकोयमर्थः ईषदसमाप्तिर्नाम। तस्यैकत्वादे
कवचनं प्राप्नोति॥ ॥ ॥

मीषदसमाप्तिमेत्याह ईषदसमाप्ताविति। ईषदसमाप्तौ यथेष्टं लिंगवचनासिद्धिरित्यर्थः। एकवचनमिति। एकत्वादीषदसमाप्तेः षष्ठीप्रसंगं तु न चोदयति गुणगुणिनोरिह
सर्वदा सोयमित्यभेदसंबंधस्य विवक्षितत्वात् भेदनिबंधनायाः षष्ठ्याः प्रसंगाद्य द्येवं गुणवचनानामाश्रयतो लिंगवचनानीति लिंगवचनदोषोपि नास्ति। नैवं शक्यमि
ह गुडकल्पा द्राक्षा बहुगुडा द्राक्षेति यदि ईषदसमाप्तेर्द्राक्षाश्रयत्वं तदा बहुगुड इति न सिध्यति अथ गुडाश्रयत्वं ततो गुडकल्पेति न सिध्यति॥ का पुनर्द्राक्षाया राम०
गुडस्येषदसमाप्तिर्येन माधुर्येण गुणेन द्राक्षायां गुडशब्दो वर्त्तते तस्यासमाप्त्या गुडस्येषदसमाप्तिः॥ ॥७॥ ॥ श्री ८२

प्रकृत्यर्थविशेषणत्वादिति । उभयानुग्रहादेवं हि प्रकृतिरप्यनुगृहीता भवति प्रत्ययोऽपि द्योतकत्वात् । एवं च स्वार्थिकत्वात् प्रकृतितो लिङ्गवचनानि सिध्यन्ति । यत्र तु नेष्यते
तत्र णाच्चः स्त्रियामजिति ज्ञापकेन तदतिहन्निरिति वक्ष्यते ॥ प्रकृत्यर्थे चेदिति । ननु गुडकल्पा द्राक्षेत्यादौ गुड इयं द्राक्षेत्यभेदविवक्षायां गुडादयो द्राक्षादिषु वर्तमानाः
प्रत्ययानुत्पादयन्तीति द्राक्षादिगतलिङ्गवचनोपपत्तौ नास्त्यव्याप्तिदोषः नैतदस्ति । गुडादयः शब्दा इवार्थाभ्यन्तरीकरणेन सोऽयमित्यभेदसंबन्धेन द्राक्षादि
षु वर्तमाना स्वप्रकृतिलिङ्गसंख्या एव वर्तन्ते तत्र बहुगुडो द्राक्षेत्यादिसिध्यति गुणशब्देभ्यश्च पद्वादिभ्यः कल्पादिषु दोषाभावो जातिशब्देभ्यस्तु कल्पादि

प्रकृत्यर्थविशेषणत्वात् सिद्धं सिद्धमेतल्लक्ष्यं ॥ नायं प्रत्ययार्थः । किं तर्हि प्रकृत्यर्थविशेषणमेतत् ईषदसमाप्तौ यत्राजिपदिकं वर्तते तस्मा
त्कल्पबादयो भवन्ति । कस्मिन्नर्थे । स्वार्थ इति । स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यनुवर्तन्ते । प्रकृत्यर्थे चेल्लिङ्गवचनानुपपत्तिः । प्रकृ
त्यर्थे चेल्लिङ्गवचनयोरनुपपत्तिः । गुडकल्पा द्राक्षा । तैलकल्पा प्रसन्ना । पयस्कल्पा यवागूरिति । सिद्धं तु तत्संबन्ध उत्तरपदा
र्थे प्रत्ययवचनात् सिद्धमेतल्लक्ष्यं ॥ तत्संबन्धे ईषदसमाप्तिसंबन्धे उत्तरपदार्थे प्रत्ययो भवतीति वक्तव्यं ॥ =यकुत्री...= ॥ ॥

षु भिन्नलिङ्गसंख्याजातसमभिधाने गुडकल्पाद्राक्षेत्यादौ दोषः सिद्धं त्विति । यद्यप्युत्तरपदशब्दः समासावयवे रूढस्तथापि इह प्रकृत्यर्थस्य प्रत्ययार्थस्य भावात् प्रत्य
यार्थविशेषवाचिनि द्राक्षादिपदे योगिको वर्तते न गुडादिभ्य उपमानवाचिभ्य उपमेये द्राक्षादौ प्रत्यय इत्युक्तं भवति गुड इवेयं द्राक्षेषदसमाप्ता गुडकल्पेति यद्यप्यु
पमानग्रहणं नोपात्तं तथापि सामर्थ्याद् उपमानोपमेयभाव आश्रीयते पद्वादिभ्योऽपि तत्र वप्रत्ययोत्पत्तिर्येषु परिपूर्णा पटवः सन्तो लोके पटुरिति प्रसिद्धं तेन तु ल्पा ई
षदसमाप्तः पटुकल्पो देवदत्त इति तत्संबन्ध इति वचनादीषत्तादृशे प्रत्ययाभावः ॥ ॥ ॥७॥ ॥

=ईषदसमा...प्तिसंबन्धाभावादीषत्पटौ...प्रत्ययः ।१=

सिध्यतीति यद्यप्यस्मिन्पक्षे बहुगुडो द्राक्षेत्यादि न सिध्यति द्राक्षादिगतलिङ्गवचनप्रसङ्गात्तथाप्युक्तदोषपरिहारात् सिध्यतीति सूक्तम्। स्त्रीग्रहणमिति। कर्मव्यतिहारे णच्
स्त्रियामिति स्त्रीलिङ्गे भावे णचो विधानात्तदन्तात्स्वार्थे प्रत्ययः स्वार्थिकत्वात् स्त्रियामेव भविष्यतीति स्त्रीग्रहणं न कर्तव्यं तत्क्रियमाणं लिङ्गवचनातिवृत्तिं ज्ञापयति। नापी
ति। उत्तरसूत्रे तु ग्रहणं दृश्यमाणनियमार्थं तत् प्रकृतेर्ये लिङ्गवचने ते एव बहुच्सु सन्ने भवतः अथ वा स्त्रीग्रहणे नानुवृत्तिनियमाभावो ज्ञाप्यते इत्यनुवर्त्स्यति

सिध्यति। सूत्रं तर्हि किमिष्यते। यथान्यासमेवास्तु॥ ननु चोक्तं ईषदसमाप्तौ क्रियाप्रधानत्वात्तल्लिङ्गवचनानुपपत्तिरिति॥ परिहृत
मेतत्प्रकृत्यर्थविशेषणत्वात्सिद्धमिति। ननु चोक्तं प्रकृत्यर्थे चेल्लिङ्गवचनानुपपत्तिरिति। नैष दोषः आचार्यप्रवृत्तिर्ज्ञापयति
स्वार्थिका अतिवर्तन्ते अपि लिङ्गवचनानीति। परं यण्णचं स्त्रियामनुवर्ततीति स्त्रीग्रहणं करोति। यद्यप्येतत् ज्ञाप्यते न बहुगुडो द्राक्षा
बहुतैलं प्रसन्ना बहुपयोपवागूरिति अत्रापि प्राप्नोति। नाप्यतिवर्तन्ते किं पुनरिहोदाहरणम्॥ पटुकल्पोमृदुकल्प इति नैत
दस्ति। निर्ज्ञातस्यार्थस्य समाप्तिर्विसमाप्तिश्च भवति गुणाश्चानिर्ज्ञाताः॥ ॥ ॥

तृतीयस्याप्रयोगं भवतः अथवा कास्त्रगोणीभ्यां ष्टरजित्त्विषित्करणेन स्त्रियां ङीष् येनानुवृत्तिरपि ज्ञाप्यत इत्युभयसिद्धिः॥ किं पुनरिति गुणशब्दानामनल्पपरिमाण
विषयत्वात् गुणसंबंधमात्रेण मंदमध्यमोत्कृष्टगुणे सर्वत्र वर्तनादीषदसमाप्तेरभावं मत्वा प्रश्नः निर्ज्ञातस्येति अयमेवेत्येवं निश्चितस्येत्यर्थः॥ विसमाप्तिश्चेति न त्र
थैव शब्दः गुणाश्चानिर्ज्ञाता इति इयदेव पाटवमिति यत्तया न ज्ञायन्ते गुणाः द्रव्यमिदानीमुपन्यस्यति॥ ॥ ॥ ॥

=अभिधानस्वाभाव्यात्

इदंतर्हीति। नन्वत्र न गुडादय ईषदसमाप्ताः किंतर्हि द्राक्षादय इति द्राक्षादिभ्य एव प्रत्ययेन भाव्यं नैष दोषः। यदपेक्षया परस्येषदसमाप्तिर्भवति तद्वाचिनः प्रत्ययेन भाव्यं तत्रैवार्थमभ्यंतरीकृत्य साभेदोपचारात्। गुड इव गुडो द्राक्षेति माधुर्याद्द्राक्षायां गुडत्वस्यारोपात् आरोपनिमित्तस्य माधुर्यस्येषदसमाप्तत्वात् गुडादिभ्यः प्रत्ययोत्पत्तिरविरुद्धा। द्रव्यमपीति। इयता माधुर्येण द्राक्षा गुड उच्यत इत्येवमपरिज्ञानाद्द्राक्षाभेदेन च गुडस्य भेदात्कं गुडमपेक्ष्य द्राक्षा गुड ईषदसमाप्त उच्यत इत्येवमपरिज्ञाने कृतकल्पमिति। आशंसायां भूतवच्चेति प्रत्ययविधानादस्ति क्रियाया ईषदसमाप्तिरूपा इति भावः। इतरो यथोक्तमभिप्रायमप्रतिपद्याह क्तान्तादिति। क्रिया

इदंतर्हि गुडकल्पा द्राक्षा तैलकल्पा प्रसन्ना। पयस्कल्पा यवागूरिति। द्रव्यमप्यनिर्ज्ञातं। इदंतर्हि कृतकल्पं भुक्तकल्पं पीतकल्पं॥ क्तान्तात्प्रत्ययविधानानुपपत्तिः क्तस्य भूतकाललक्षणत्वात्कल्पादीनां चासमाप्तिवचनात्॥ क्तान्तात्प्रत्ययविधेरनुपपत्तिः किं कारणं। क्तस्य भूतकाललक्षणत्वात् कल्पादीनां चासमाप्तिवचनात्॥ असमाप्तिवचनाश्च कल्पादयः। न चास्ति संभवः यद्भूतकालं च स्यात्॥ असमाप्तिश्चेति सिद्धं तु आशंसायां भूतवद्वचनात्॥ सिद्धमेतत्कथं॥ आशंसायां भूतवच्चेत्येवमत्र क्तो भविष्यति। इदं चाप्युदाहरणं॥ यद्गुडकल्पो [illegible]म उकल्प इति॥ ननु चोक्तं निर्ज्ञातत्वादर्थस्य समाप्तिर्वा भवति असमाप्तिर्वा। गुणस्त्वानिर्ज्ञात इति॥ ॥ ॥

फलनिर्वृत्तौ क्रियापवर्गो भवति सति च क्रियापवर्गे कुतः क्रियाया ईषदसमाप्तिरसिध्येः सिद्धं त्विति। भविष्यत्कालाया ईषदसमाप्तायाः क्रियाया आशंसमानत्वादिसध्ये:। जीतः क्तोऽमतिबुद्धिपूजार्थेभ्यश्चेति वर्तमानकालविषयः क्तान्तादपि प्रत्ययेन भाव्यं ज्ञातकल्पं पूजितकल्पमितीतरथा तिरू. तादपि पचतिकल्पमितिवदपि क्रियैकदेशापवर्गाश्रयेण भूते क्तो विधीयते तदापि कल्पादयो भवंति कृतकल्पवद्भुक्तमिति। एवं च कृता कृतादय एकदेशाकरणे कृ ॥ आश्रयाः प्रयोगा उपपन्नाः। सकलक्रियापवर्गाश्रयभूतकालविषयक्तप्रत्ययापेक्षे तु चोद्यमति समाधाने। एवं च कालत्रयविषयेभ्यस्तिङंतेभ्यः कल्पादयो भवंति। पचतिकल्पं पक्ष्यतिकल्पमपाक्षीत्क

भा॰कै॰५ लोकत इति यावता माधुर्येण लोके द्राक्षायां गुड इव व्यवहारस्तावद्यश्रयस्य ईषदसमाप्तिसंभवः अथ वा गुडगतमाधुर्यो ऽश्रयेण द्राक्षायां गुडत्वारोपात् गुडजातिसभावाच्चेष

८४ दसमाप्तं गुडत्वं द्राक्षायां गुड इयं द्राक्षा गुडकल्पा द्राक्षेति प्रयोगः विभा अथ स्त्रवन्त्रहणमिति सुबन्तस्य प्रियकुत्सनादिषु वर्त्तनात् दर्थेल्ल प्स्तुबन्तत्वमिति प्रश्नः प्रा

तिपदिकान्माभूदिति अन्वयव्यतिरेकाभ्यां प्रसयानामिह शास्त्रे अर्थवत्ता परिकल्पनात्प्रा ति पदिकमपि स्वार्था दि पंचकेप्रवर्त्तमानं प्रियकुत्सनादिषु प्र

वर्त्तते इति ततोपि प्रत्ययप्रसंग इति भावः नात्यन्त विशेष इति न नु सुबन्तादुत्पन्नोसस्त्वं बहुसे च इत्यादौ सात्पदाद्योरिति षत्वप्रतिषेधः स्ति ख्याति प्रातिपदिका

लोकतो व्यवहारं दृष्ट्वा गुणस्य निर्ज्ञानं॥ तद्यथा पटुरयं ब्राह्मण इत्युच्यते। यो लघुनोपायेनार्थान्साधयति॥ पटुकल्पोयमित्यु

च्यते॥ यो न तथा साधयति॥ इदं चाप्युदाहरणं गुडकल्पा द्राक्षा तैलकल्पा प्रसन्ना पयस्कल्पा यवागूरिति। ननु चोक्तं॥ द्रव्यमनि

र्ज्ञातं इति॥ लोकतो द्रव्यमपि निर्ज्ञातं॥ विभाषा सुपो बहुच्पुरस्तात्तु विभाषाग्रहणं किमर्थं विभाषा बहुच् यथा स्यात् बहुचा मुक्ते वा

॰कप्रमपि यथा स्यात्॥ ॥ ॥

नृ सन्नौ षत्व प्रसंगः नैष दोषः सुबन्ताउत्पन्नो अवग्रंपपदसंज्ञानिबंधनकुत्वादिनिषेधार्थो यत्नः कर्त्तव्यो बहुच् पूर्वे सत्ववमतालत्वे पदादिविधौ प्रत्ययलक्षणमि

तितन्नियमार्थं पदादिविधावेव न पदान्तविधाविति एवं च प्रातिपदिकात्प्युत्पन्नो यत्नः करिष्यते सात्पदाद्योर्बहुच् स्त्रेति अत एव तुल्यन्यायतया सुपश्चात्म गस॰

नःक्य जित्यस्य सुग्रहणस्याक्षेपः॥ एवं तिङो विधिरिति अप्यस्य ज्ञापनार्थमिह सुग्रहणं तेन एवं प्रातिपदिकात्तिङ्तात्त्वकल्पादयः सिद्धं तीत्यर्थः॥ ८४

नैतदस्तीति॥ ज्ञापकमंतरेणापि तिङोनुवृत्तिः सिध्यतीत्यर्थः॥ ॥ श्री ॥ श्री श्री श्री

नैतदस्ति प्रयोजनं। प्रकृतामहविभाषा तया वाक्यमपि भविष्यति॥ इदं तर्हि प्रयोजनं। कल्मादयोपि यथा स्युरिति। ननु चद्रुजपुच्यते। कल्मादयोप्युच्यंते। तदुभयं वचनाद्भविष्यति॥ नैवं शक्यं। अक्रियमाणे हि विभाषाग्रहणे अनवकाशो बहुच् कल्मादीन्बाधेत कल्मादयोप्यनवकाशाः ते वचनाद्भविष्यंति। सावकाशाः कल्मादयः कोऽवकाशः तिङंतान्यवकाशः॥ अथ सुब्ग्रहणं किमर्थं। सुबंताडुसन्निर्यथा स्यात्॥ प्रातिपदिकान्माभूदिति॥ नैतदस्ति प्रयोजनं॥ नास्त्यत्र विशेषः सुबंताडुसन्नौ सत्यां प्रातिपदिकाद्वा यद्येवं इदमपि नार्थः सुब्ग्रहणेन सुपश्चात्मनः क्यजिति॥ इदमपि नास्ति विशेषः सुबंताडुसन्नौ सत्यां प्रातिपदिकाद्वा अयमस्ति विशेषः सुबंताडुसन्नौ सत्यां पदसंज्ञा सिद्धा भवति॥ प्रातिपदिकाडुसन्नौ सत्यां पदसंज्ञा न प्राप्नोति॥ ननु च प्रातिपदिकाडुसन्नौ सत्यां पदसंज्ञा सिद्धा। कथमारभ्यते नः क्य इति। तच्चावश्यं वक्तव्यं॥ सुबंताडुसन्नौ सत्यां नियमार्थं॥ तदेव प्रातिपदिकाडुसन्नौ सत्यां विध्यर्थं भविष्यति॥ इदं तर्हि प्रयोजनं। सुबंताडुसन्निर्यथा स्यात् तिङंतान्माभूदिति एतदपि नास्ति प्रयोजनं॥ अप्रातिपदिका वर्त्तते। अतडंतं पठति॥ बहुचि सुब्ग्रहणात् सर्वत्र तिङो विधानं बहुचि सुब्ग्रहणं क्रियते। सर्वत्र तिङो विधिर्यथा विज्ञायेत॥ नैतदस्ति प्रयोजनं। प्रकृतं तिङ्ग्रहणमनुवर्त्तते। क्व प्रकृतं। अतिशायने तमबिष्ठनौ तिङश्चेति। एवं तर्हि बहुचि सुब्ग्रहणं सर्वत्र तिङो विधानात् बहुचि सुब्ग्रहणं क्रियते सर्वत्र तिङो विधानात्। सर्वत्र तिङश्चेत्यनुवर्त्तते। तदिदमपि प्राप्नोति॥ ननु च तिङ्ग्रहणं निवर्त्तते। अवश्यमुत्तरार्थमनुवर्त्यं॥ अप्रत्ययसर्वनाम्नामकच् प्राक्टेरिति। पचतकि जल्पतकीत्येवमर्थं। यदि सुब्ग्रहणं क्रियते सुप एव न सिध्यति॥ ॥ ॥ ॥

एवंस्वर इति जस उदात्तत्वं स्यात् पटुशब्दोकारस्य चेष्यत इत्यर्थः॥ स्वरः प्रातिपदिकत्वादिति। बहुचि कृते प्रकृतिप्रत्ययसमुदायस्यार्थवत्वात् समुदायाच्च जसो विधा
नाज्जस्याप्रसयात्तत्वात्प्रातिपदिकसंज्ञायां ससांप्रर्वो सन्नाया विभक्तेर्लुकि कृते पटुशब्दस्योकारस्योदात्तत्वं भवति यावत्तस्या विभक्तिरस्य घतेन साप्रकृ सव
यव इति तस्या उदात्तत्वाप्रसंगः ननु समासग्रहणस्य नियमार्थत्वात् प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा न प्राप्नोति नैष दोषः अप्रत्यय इति प्रति

=स्यतः पठिष्यति भितः कुबप्रत्ययो कृतेन दोत्कारस्य कथं स्वरस्यार्थः।९=

बहुपटवर एवं स्वरः प्रसज्येत। बहुपटव इति चेष्यते। पठिष्यति ह्याचार्यः चितः सप्रकृतेर्बह्वकजर्थमिति स्वरः कथं स्वरः
प्रातिपदिकत्वात्॥ सुब्लुकि कृते प्रातिपदिकत्वात् स्वरो भविष्यति। अथ तु ग्रहणं किमर्थं। तुग्रहणं नित्यपूर्वार्थं। तुग्रहणं क्रि
यते। नित्यं पूर्वो यथा स्यात्॥ विभाषा मा भूदिति। नैतदस्ति प्रयोजनं। न विभाषाग्रहणेन पूर्वं सम्बध्यते॥ किं तर्हि
बहुजभिसंबध्यते। विभाषा बहुज् भवतीति। यदा च भवति तदा पूर्वो भवतीति इदं तर्हि प्रयोजनं॥ ॥ ॥

षेधो ज्ञापयति प्रकृतिप्रत्ययसमुदायस्य समासग्रहणेन प्रातिपदिकसंज्ञा न निवर्त्यत इति अन्यथा ह्यप्रत्यय इति प्रतिषेधोऽनर्थकः स्यात्। नित्यपूर्वार्थमि
ति॥ पुरस्तादेवैष एवमवधारणार्थं तुग्रहणमित्यर्थः अन्यथा प्रत्ययवत् पूर्वत्वस्यापि विधेयतया प्राधान्याद्विभाषाग्रहणेन संबन्धः स्यादिति भावः॥ किं तर्हि
बहुजिति बहुजेव विधेयत्वात् प्रधानं विभाषाग्रहणेन संबध्यते तस्य तु परदेशव्यावृत्तये पुरस्तादिनेन विशेषणेन देशविशेषो निर्दिश्यते तेन न ह्य विभाषा
९ ग्रहणेन पुरस्तादित्यस्यापि संबन्धाभावोऽगुणानां च परार्थत्वादसंबन्धः समत्वात् स्यादिति न्यायात्॥

प्रागुत्पन्नेरिति तु शब्दो नियमार्थः ॥ पुरस्तादेव सर्वं भवतीति तेन लिंगसंख्ये प्रकृतिगते भवतः प्रयोगश्च प्राक् प्रकृतेः पटुकल्पतर इति न तु परत्वात् कल्पबादिभिर्वोधितत्वा
त्तरप्तमपः ॥ प्रान्नाभाव्यं नेषद्दोषः कल्पबादिभिः प्रकर्षस्याद्योतनात्पुनः प्रसंगविज्ञानात् कल्पबाद्यन्तात् प्रकर्षद्योतनाय तरप्तमपौ भवतः प्रकृतेरेवेति कल्पबादी

प्रागुत्पन्नेर्यल्लिंगं वचनं च तदुत्पन्नेपि यथा स्यात् बहुगुडो द्राक्षा बहुतैलं प्रसन्ना । बहुपयो यवागूरिति । एतदपि नास्ति प्रयोजनं । स्वा
र्थिकोयं स्वार्थिकाश्च प्रकृतितो लिंगवचनान्यनुवर्त्तन्ते । एवं तर्हि सिद्धे सति यन्नुग्रहणं करोति तत् ज्ञापयत्याचार्यः । स्वार्थिका अतिवर्त्तन्ते
तेऽपि लिंगवचनानीति । किमेतस्य ज्ञापने प्रयोजनं गुडकल्पा द्राक्षा । तैलकल्पा प्रसन्ना । पयस्कल्पा यवागूरित्येतत् सिद्धं भवति । तमादि
भ्यः कल्पादयो विप्रतिषेधेन । तमादिभ्यः कल्पादयो भवन्ति विप्रतिषेधेन ॥ तमादीनामवकाशः प्रकर्षस्य वचनं ईषदसमाप्तेरवचनं ।
पटुतरः पटुतमः कल्पादीनामवकाशः ईषदसमाप्ते वचने प्रकर्षस्यावचनं पटुकल्पो मृदुकल्पः उभयवचने उभयं प्राप्नोति । पटु
कल्पतरो मृदुकल्पतरः । कल्पादयो भवन्ति प्रतिषेधेन । यद्येवं ईषदसमाप्तेः प्रकर्षे तमादिः प्रत्ययः प्राप्नोति । प्रकृतेरेव च प्रकर्षे इ
ष्यते । तमादिरीषत् प्रधानादपि भवन् यस्य प्रकर्षोस्ति तस्य प्रकर्षं भविष्यति कस्य च प्रकर्षोस्ति । प्रकृतेरेव ॥ ॥ ॥

ना[illegible]तः तमादिरीषत्प्रधा

नायाप्रकृतिः यद्वादिः तदर्थस्यैव प्रकर्षः संभवति न त्वीषदसमाप्तेः । असमाप्तिप्रकर्षे समाप्तावीषदर्थो भावान्नात्वीषदसमाप्तेः प्रकर्षः ॥ ॥५॥

अव्यय अन्यतरस्यां। प्रातिपदिकस्य प्राक्टेरकज्भवति। सुबन्तस्य वा प्राक्टेः। तेवं प्राक्टेः। सनेनान्यतरच्छकृते विशेषे वक्ष्यापयितुमित्यर्थः। तूष्णीमः काम्पिति मि
त्वादच्चौ सा सकां भवति अज्ञाताद्यर्थविवक्षायां तूष्णीमिति भवति शीले कः इति। शीलं स्वभावो नियमश्च अज्ञाताद्यपवादः शीलं शशाक्ति स्वभावाच्चूतन्द्वास्तूष्णी

=कर्कौडिन्यनामाद्यः १=

अव्ययसर्वनाम्नामकच्प्राक्टेः कस्य चट्ः। किमयं सुबन्तस्य प्राक्टेर्भवति। अहोस्वित् प्रातिपदिकस्य। कुतः संदेहः। उभयं प्रकृतं अन्यतरच्छ
कं विशेषयितुं। किं चातः यदि सुबन्तस्य युष्मकाभिः अस्मकाभिः युष्मकासु अस्मकासु युवकयोः आवकयोरिति न सिध्यति। अथ प्राति
पदिकस्य त्वयका मयका। त्वयकि मयकि इत्यत्रापि प्राप्नोति॥ अस्तु सुबन्तस्य॥ कथं युष्मकाभिः अस्मकाभिः॥ युष्मकासु अस्मकासु।
युवकयोः आवकयोरिति॥ अनोकारसकारभकारादाविति वक्तव्यं॥ अप्रकरणे तूष्णीमः कां॥ अकच्प्रकरणे तूष्णीमः कांव क्तव्यः। आसि
तव्यं किल तूष्णीकां। शीले को मलोपश्च शीले को मलोपश्च वक्तव्यः॥ तूष्णीं शीलः तूष्णीकः। इह भिन्नकिच्छिन्नकीति। अपि कृतेशप्राप्नो
ति॥ बहुभुक्के बहुपीतं बहुचिक्ते कल्पादयः प्राप्नुवन्ति। उच्चकैः नीचकैः अकचिकृते कादयः प्राप्नुवन्ति। ननु च स्मं बहुजकचोपवादास्ते
बाधका भविष्यन्ति। स्मं बहुजकश्च नानादेशत्वादुत्सर्गप्रतिषेधः। स्मं बहुजकश्च नानादेशत्वा उत्सर्गस्य प्रतिषेधो वक्तव्यः॥ समा
नदेशैरपवादैरुत्सर्गाणां बाधनं भवति॥ नानादेशत्वान्न प्राप्नोति॥ ॥ ॥ ॥

कउच्यते। इह भिन्नकीति भिन्नदेशत्वाद्विरोधाभावादनेकेनापि प्रत्ययेन प्रदीपेनेव घटादेर्गोप्याय रूपाणां षडीश्यंशीलस्येवा ज्ञातादेरेकस्यार्थस्य द्योतनमविरुद्धम्
न्यमानो वार्त्तिककार उत्सर्गप्रतिषेधं शास्ति भाष्यकारस्तु विरोधमन्तरेणापि सामान्यविशेषे वाधकं विशेषविधिमन्यत्रादीदृशत्॥ ॥ ॥

कविधेरिति अज्ञातः प्रकृष्टः पटुरिसर्थे द्वयविवक्षायां पटुतमकः इति भवति छिन्नकतरमिति अन्नः संतगतौ कारितिक निकृनेतरए अर्द्धपिप्पलिकेति कुत्सितमर्द्धपि
पप्यादसाद्यर्थविवक्षायां समासे कृते ततः कप्रत्ययः नवग्रामक इति समासात् संज्ञायां कन्निति कुत्सायां कः स्वले वा कनिससाद्युदात्तत्वं भवति पूर्वं तु कनिसति

कविधेस्तमादयः पूर्वविप्रतिषिद्धं॥ कविधेस्तमादयो भवंति। पूर्वविप्रतिषेधेन। कविधेरवकाशः कुत्सादीनां वचनं प्रकर्षस्यावचनं। पटुकः। तमादीनामवकाशः प्रकर्षस्य वचनं कुत्सादीनामवचनं पटुतरः पटुतमः उभयवचने उभयं प्राप्नोति। पटुतरकः। पटुतमकः। तमादयो भवंति पूर्वविप्रतिषेधेन। कदाचिच्छिन्नकतरादयः। कदाचिच्छिन्नकतरादयो भवंति विप्रतिषेधेन। छिन्नकतरं छिन्नकतमं। एकदेशिप्रधानस्य च समासः॥ एकदेशिप्रधानस्य च समासः कविधेर्भवति पूर्वविप्रतिषेधेन। अर्द्धपिप्पलिका। अर्द्धकोशातकिका। उत्तरपदार्थप्रधानस्य च संज्ञायां कन्विधिप्रसर्थे। उत्तरपदार्थप्रधानस्य च समासो भवति। पूर्वविप्रतिषेधेन। किं प्रयोजनं। संज्ञायां कन् विधास्यति संज्ञायां कन्प्रयासस्यात्॥ नवग्रामकं नवनगरकं कदाचित् द्वंद्वः कविधेर्भवति पूर्वविप्रतिषेधेन। प्लक्षकन्यग्रोधकाविति ॥ प्लक्षन्यग्रोधकाविति॥

पश्चात्समासे क्रियमाणे अंतोदात्तत्वप्रसंगः अत्र संज्ञाकुत्सनादिहेतुकाविषयभावे नास्ति सामानाधिकरण्यं च पदयोरिति युगपत्कार्यद्वयप्रसंगादस्ति

॥ विप्रतिषेधः॥ श्री ॥७॥ ॥

कुत्सिते॥स्वशब्देनोक्तत्वादिति अनिर्धारितविशेषेऽर्थे यदा प्रत्ययो निर्वर्त्यते तदा तद्विशेषद्योतनाय स्वार्थिकः प्रत्ययो विधीयते यदा तु निर्ज्ञातविशेषण एवार्थे कुत्सितादयः शब्दा
वर्त्तन्ते तदा विशिष्टस्यार्थस्य प्रतीतत्वात् चरितार्थत्वात् प्रत्ययाप्रसङ्गः प्रतीतप्रत्यायने न च स्यात् प्रसङ्गादिति भावः। कुत्सितस्येति। अर्थान्तराश्रयः प्रत्यय इत्यर्थः। अथ वे
ति। कुत्सितकुत्सायामपि कुत्सितक इति भवतीत्यर्थः। [redacted] स्वशब्देनात्मीयवचनो [redacted] र्थं शब्देनाभिधेयवचनः स्वोऽर्थः स्वार्थः स
चानेकप्रकारो जातिगुणक्रियासंबंधस्वरूपलक्षणः गौः शुक्लः पाचको राजपुरुषो डित्थ इति तं स्वार्थमभिधाय तेन स्वार्थेन समवेतं संबद्धं द्रव्यमाह शब्दः निरपे

कुत्सिते॥इह कुत्सित कः अनुकम्पितक इति स्वशब्देनोक्तत्वात् तस्यार्थस्य प्रत्ययो न प्राप्नोति। नैष दोषः। कुत्सितस्यानुकम्पा
यां अनुकम्पितस्य कुत्सायां। अथ वा स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतं॥ ॥ ॥

=वर्त्तत इति· जातिं विशेष्यत्वेनावशेष इत्यर्थः।२= =शब्दनिष्ठप्रकारकोपस्थितेरभावादित्यर्थः। निमित्तान्तरमिति· शब्दस्वरूपादिरित्यंगोत्वत्वादिकमित्यर्थः।१=

क्ष इत्यनेनैतत् दर्शयति यथा द्रव्येऽभिधातव्ये स्वार्थोऽपेक्ष्यते न तथा स्वार्थेऽभिधातव्येऽर्थगतं निमित्तान्तरमपेक्षते द्रव्यशब्दे न च इदं तदिति परामर्शयोग्यं वस्त्वभिधीयते
तेन जातिशब्दो यदा जातौ वर्त्तते तदा तेषां स्वरूपं स्वरूपेणोपात्तं जातिमाहेति तदा तेषां स्वरूपं स्वार्थः जातिस्तु द्रव्यं यदा तु जातिविशिष्टं द्रव्यमाह तदा जातिः स्वार्थः
शुक्लादयो यदा गुणजातौ वर्त्तन्ते तदा तेषां स्वरूपं स्वार्थः जातिर्द्रव्यं यदा तु गुण एव वर्त्तन्ते तदा गुणसामान्यं स्वार्थो गुणो द्रव्यं यदा द्रव्य एव वर्त्तन्ते तदा गुणः स्वार्थः समवेतस द्रव्य
स्याभिधाने सति लिंगवचनविभक्तीर्वाहेति संबंधः॥ ॥ ॥

=स्वरूपं स्वार्थ इति· एतेनैतदुक्तं· गौः शुक्लः चलो डित्थ इत्यादौ विशेषणतया भासमानस्यासत्वं तस्य जातिगुणादेः स्वरूपं तत्तुल्यन्यायात् तत्तु गोत्वत्वादिनेत्याहुः।३= =लिंगसंख्यान्वयिनी जातिर्विशेष्यतया भासत इत्यर्थः।१=

तान्विशेषानिति लिंगादीनामेवु परामर्शः॥ लिंगं स्त्रीत्वादि वचनं संख्या विभक्तिः कारकं कर्मादि क्वचिल्लिंगसंख्याकारका एव स्वार्थो यथा। स्त्री पुमान्नपुंसकमेको द्वौ बहवः क
र्मकरणं संप्रदानमिति। प्रवृत्तिनिमित्तलिंगसंख्याव्यतिरिक्तलिंगसंख्याभिधाने यत्र यथा सन्नपुंसको भवतु गावो विंशतिरिति तत्रायमेव क्रमोपपत्तः प्रवृत्तिनिमित्तव्यतिरि
क्तलिंगसंख्याः संभवः स्त्री पुमानेको द्वौ बहव इति तत्र पुनर्लिंगसंख्ययोरभिधानाभावः यद्यपि लोके पदा उच्चारिताद्युगपत् पंचार्थाः प्रतीयन्ते शब्दस्य विरम्य व्यापाराभावात्त
थाप्यन्वयव्यतिरेकाभ्यां शास्त्रे संव्यवहाराय कल्पिताभ्यां प्रातिपदिकस्य प्रयोगार्हस्य कुत्सितामर्थवत्तां कल्पितन्यायवशात् क्रमवतीमाश्रित्येदमुच्यते तथा हि नागृहीतवि
शेषणा विशेष्ये बुद्धिरिति न्यायात् पूर्वं स्वार्थाभिधाने न भाव्यं पश्चात्तद्विशिष्टस्य लिंगाद्याश्रयस्य द्रव्यस्याभिधानेन। ततो भेदापेक्षं बहिरंगसंख्यापेक्षया लिंगमंत
रंगमिति तदभिधीयते ततः संख्या सा हि विजातीयक्रियापेक्षसाधनापेक्षया तुल्यजाती[redacted]यापेक्षां तेरंगा संख्याभिधानानन्तरं तु कारकाभिधानं। एतान्विशेषानभि
ति

=एकताद्यपेक्षाद्वित्वादिरूपा=

समवेतस्य च वचने लिंगं वचनं विभक्तिं च अभिधायतान्विशेषानपेक्षमाणाः स्वकृतत्वमात्मानं प्रियकुत्सनादिषु पुनः प्रवर्त्तते सो विभक्त्यंतः॥ ० ॥

=स्वार्थादिपंचकपूर्णस्येन स्वकृतित्वमित्युपपादनस्य प्रकृतोपयोगं दर्शयति नवेति ५=

=स्वार्थादिपंचकवतः विभक्त्यंतस्य स्वकृतत्वमात्मानमपेक्षमाणः प्रियकुत्सनादिषु प्रवर्त्तत इत्यन्वयः।१०=

धायस्वार्थादिपंचकवृत्तं कृतत्वमात्मानमपेक्षमाणः शब्दः प्रियकुत्सनादिषु विभक्त्यंतः पुनः प्रवर्त्तते[redacted] पुनः शब्दस्तु शब्दस्यार्थे वर्त्तते विभक्त्यंतात्स्विसर्थः। तत्र कु
त्सितशब्दप्रवृत्तिनिमित्तव्यतिरिक्तायां कुत्सितत्वस्य कुत्सायां कप्रत्यय उपपन्नो भवति यथा प्रकृष्टतम इति प्रकृष्टस्य प्रकर्षे तमप्रत्ययः तथा कुत्सितत्वं यदा कुत्स्यते तेनास्य सम्य
कुत्सितत्व मिति तदा प्रत्ययः अन्ये त्वाहुः अनिर्धारितविशेषधर्म्मनिबंधना कुत्सा कुत्सितशब्दप्रवृत्तिनिमित्तं ब्रह्महत्यादिविशेषनिबंधना तु कुत्सा प्रत्यय निबंधनं अनु
कंपितकः सत्त्वापि प्रयोक्तृधर्म्मेनुकंपायां प्रवृत्तिनिमित्तमतिरिक्तायां कप्रत्ययः केचित्तु निरपेक्षत्वं शब्दस्य स्वार्थादिपंचकाभिधाने मुख्यमज्ञानपेक्षणात् बुद्ध्युपारूढो
पचरितार्थसत्तामात्रापेक्षणाद्व्याचक्षते तत्र परिसमाप्त स्वार्थादिपंचकस्य परस्य कुत्सादिषु प्रवृत्तिर्यस्मात्स्वार्थादयः कुत्सादिहेतवः तथा हि कश्चित्स्वार्थं कुत्स्यते पटुकः
पंडितक इति कश्चिल्लिंगेन यथा प्राप्य गां दीवधन्वानं विद्धिको रवकाद्रिपद इति कदाचित्संख्यया यथेदमेकमेव शतमिति शतभरणीय उः एवं तदेकस्यैव भरण इति शतत्वेनोपे
ण कुत्सा यत्र तु प्रवृत्तिनिमित्तकुत्सा न संभवेदेवं रक्तको रित्थकः इति तत्राभिधेयसहचारितधर्म्मान्तराश्रय कुत्साश्रयः प्रत्ययः॥ ॥ तथाकु ॥
ति

भा० कै० ५ कथं पुनरितियदा कुत्सित शब्दो भावसाधनः कुत्सा कुत्सितमिति तदा प्रत्ययार्थपक्षः। यदा तु कर्मसाधनः कुत्स्यत इति कुत्सितम् तदा समासादिसूत्रे चकारस्यानुक्तसमुच्चयार्थत्वा

८८ त् वर्तमाने क्तः। क्रियावयवव्यपवर्गाश्रयो भूते वा तदा कुत्सितार्थवाचिनः कः प्रत्ययो भवतीति समानाधिकरणपक्षोपपत्तिः। कः पुनर्वक्ष्यमाणस्य प्रकृत्यर्थविशेषणपक्षस्य समा

नाधिकरणपक्षस्य च विशेषः उच्यते। समानाधिकरणपक्षे उत्पन्ने कुत्सोनुपात्ते कुत्सो कुत्सितत्वोपलक्षणार्थवृत्तिः प्रत्ययमुत्पादयति प्रकृत्यर्थविशेषणपक्षे तु गौणकुत

त्सादेव प्रत्ययेन भाव्यं तत्र प्रकृत्यर्थविशेषणपक्षे अगृहीतकुत्सापदसामानाधिकरण्ये व्यपसर्वनामशब्देभ्यः प्रत्ययेन भाव्यं यद्को नीचैरसौ देवदत्त इति पदान्तं गौणत

=ननु कुत्सार्थपदेन वाच्यः।१= ननु व्यमिति समानाधिकरणपक्षे न कुत्साया उक्तत्वात्कते कुत्सादिविशिष्टत्वाभावादिति भावः।१=

कथं पुनरिदं विज्ञायते। कुत्सितादीनामर्थ इति। अहोस्वित्कुत्सितादिसमानाधिकरणात् प्रातिपदिकादिति।। कश्चात्र विशेषः। कुत्सितादीनामर्थे

चेत् लिंगवचनानुपपत्तिः। कुत्सितादीनामर्थे चेल्लिंगवचनयोरनुपपत्तिः। पटुकं। पटुकः पटुका। पटुकौ। पटुका इति। एकोयमर्थः। कुत्सि

तं नाम। तस्यैकत्वादेकवचनमेव प्राप्नोति। अस्तु तर्हि कुत्सितादिसमानाधिकरणात् प्रातिपदिकादिति। कुत्सितादिसमानाधिकरणादिति चेदति

प्रसंगो यथा टाबादिषु कुत्सितादिसमानाधिकरणादिति चेदतिप्रसंगो भवति यथा टाबादिषु। कथं च टाबादिषु। उक्तं तत्र। ङ्यांसमानाधिकर

णादिति चेद्भूतादिष्वतिप्रसंग इति।। एवमिहाप्यतिप्रसंगो भवति।। ॥ ॥

कुत्स्यपदं न तु प्रयोगः। तदा तेभ्य एवाश्रितकुत्सेभ्यः प्रत्ययो भवति नीचकैरसकौ देवदत्तक इति लिंगवचनानुपपत्तिरिति यथेष्टं लिंगवचनानुपपत्तिरित्यर्थः। एतच्चोपलक्ष

णं कुत्सनमात्रस्य प्रत्ययेनाभिधाने पृष्ठस्यापि द्रव्यवाचिनः प्राप्नोतीति यद्यपि गुणगुणिनोरत्र सर्वदा सोपमिस[illegible]भेदसंबंधे न षष्ठ्या अप्रसंगे गुणवचनानां चाश्र गम०

यतो लिंगवचनानि इति दोषपरिहारोप्यस्ति तथापि निर्दोषप्रकृत्यर्थविशेषणपक्षसंभवात्प्रत्ययार्थपक्षो भाष्यकारेणानाश्रितः।। ॥ ॥ ८८

=पक्षे कुत्सितत्वमात्मेन कुत्सायां प्रत्ययस्ततः संबंधिविशेषविवक्षायां देवदत्तस्य पटुकमत्रिं प्राप्नोति यथा वक्ष्यति भावः।२=

इदं शकृदिः कुत्सितत्वयुक्तार्थवृत्तित्वात्तस्य तिरुं स्विति। येनध मैणकुत्सादयस्तद्धर्मयुक्ता यो भिधायिनः स्वार्थे प्रत्ययविधानमित्यर्थः॥ ठाजा। अप्रत्यय इति प्रत्ययाभावेपि पूर्व
पदोत्तरपदयोरन्यतरस्य वा लोप इत्यर्थः॥ भाष्ये तु पूर्वपदलोप उदा हरणमात्रं उ[redacted] वर्णादिति लोपस्य लइति पूर्वाचार्यसंज्ञात त्रादेः परस्येति इकारस्य लोपः॥ कादे शो नभव

=यथाश्रुसाध्यथावनादेः सम्यगनवधानादिना अन्यकरत्वादौ धतादिरादिस्वनिधानेइदं शकृःप्रत्यक्षविषयत्वेनेवबोधकोनतुकद्यतत्वादिन्तिभावः॥ २=

इदंघ तकं इदं तैलकं इदं शकृदपि प्राप्नोति सिद्धं तु येन कुत्सितादिवचनं तद्युक्तात् स्वार्थे प्रत्ययविधानात्। सिद्धमेतल्लक्ष्यं। येन कुत्सितादयोर्थागम्यंते तद्युक्ता
त्स्वार्थे प्रत्ययो भवतीति वक्तव्यं सिध्यति स्त्र त्रितार्हि मिद्यते। यथान्यासमेवास्तु॥ ननु चोक्तं कुत्सितादी नामर्थे चेल्लिंगवचनानुपपत्तिरिति॥ नैष दोषः। नायं प्रत्य
यार्थः। किं तर्हि प्रकृत्य र्थविशेषणमेतत् कुत्सितादिषु यत्त्वा तिपदिकं वर्त्तते तस्मात्कादयो भवंति। कस्मिन्नर्थे स्वार्थ इति स्वार्थिका अप्रकृतो लिंगवचनान्य
नुवर्त्तंते॥ ठाजादावूर्ध्वं द्वितीयादचः चतुर्थी चतुर्थ्यो लोपो वक्तव्यः। बृहस्पतिदत्तं बृहस्पतिकः प्रजापतिदत्तः प्रजापतिकः अनजादौ च॥ अनजादौ च लोपो वक्तव्यः।
देवदत्तको देवकः। यज्ञदत्तको यज्ञ[redacted] कः लोपः पूर्वपदस्य च लोपो वक्तव्यः देवदत्तको [redacted] दत्तकः॥ यज्ञदत्तको [redacted] दत्तकः। अप्रत्यये तथैवेष्टः देवदत्तो दत्तः उव
र्णाल्लइलस्य च। उवर्णादिलस्य च लोपो वक्तव्यः। भानुदत्तको भानुलः। वसुदत्तको वसुलः अथ ठग्रहणं किमर्थं न इके कृते अजादावित्येव सिद्धं॥ ठग्रहणमु
को द्वितीयत्वे कविधानार्थं। ठग्रहणं क्रियते॥ उक्तः द्वितीयत्वे कविधिर्यथा स्यात्। वायुदत्तको वायुकः। पितृदत्तकः पितृकः॥ अजादि[redacted] लक्षणे हिमा पिति
कादिवत्प्रसंगः॥ अजादिलक्षणे हि मापितिकादिवत्प्रसज्येत॥ तद्यथा मापितं परिणमस्य मापितिक इति अकारलोपे कृते तांतादिति कादेशो न भवति॥ एवमिहा
पि नस्यात् द्वितीयादचो लोपे संध्यक्षरस्य द्वितीयत्वे तदादेर्लोपो वक्तव्यः। लहोडः। लहिकः। कहोडः कहिकः॥ ॥ ॥ ॥

नीतिसंनिपातलक्षणपरिभाषया आश्रयणात् यदा चेदेवमान्यादिम्यष्ठज्विधीयते देकादेशो भावादजादिलक्षणालोपाप्रसंगात्तदर्थमपि ठग्रहणांतदादेरिति संध्यक्षरात्पर
((स्यलोपे प्राप्ते तदादेर्लोपवचनं॥ ॥५॥ ॥

तिऽ
पतिकः ४

भा०कै०५
८१

शेवलावह्णादीनामिति। आदिशब्दः प्रकारे एकसूत्रोपात्तत्वं च सादृश्यपनिमित्तं स्फपरिक इति संहितायां त्वनुकृते लोपे सति स्फपर्यिक इति स्यात्। जश्त्वं न स्यादिति भसंज्ञ
या पदसंज्ञाया अन्तर्वर्त्तिविभक्त्याश्रयायास्तद्धिताश्रयाया अवधिविधायाऽप्येकसंज्ञाधिकारात् बाधितत्वात्॥ सिद्धमच इति षडङ्गुलि शब्दे इ. गुलिशब्दस्या
ने नलोपे कृते यस्येति चेत्सकारलोपः क्रियते न स्यस्थानिवत्त्वात् भसंज्ञा प्रत्यकारान्तमेनन्नभवति। अन्तर्वर्त्तिविभक्त्याश्रयात्तु षड्रूपान्तस्य पदसंज्ञा ततो भिन्नावधिक

शेवलस्फपरि। वह्णादीनां च तृतीयात्सचाकृतसंधीनां। वह्णादीनां च तृतीयाह्लोप उच्यते। सचाकृतसंधीनां वक्लघ्यः। स्फप
र्याशीः सुपरिकः स्फपरिलः। इह षडङ्गुलिः षडिक इत्यजादिलोपे कृते पदसंज्ञां न प्राप्नोति॥ तत्र को दोषः। जश्त्वं न स्यात्। षडिके ज
श्त्व उक्तं। किमुक्तं सिद्धमचः स्थानिवत्वादिति। यद्येवं वाचिकादिषु पदहन्तप्रतिषेधः। वाचिकादिषु पदहन्तस्य प्रतिषेधो वक्तव्यः।
१ वागाशीः वाचिक इति॥ ॥ श्री

त्वात् भसंज्ञा न वाध्यत इति तन्निर्वधनं जश्त्वप्रवृत्तिर्न्यायानुसारेण पदमिति पद[redacted]संज्ञा सैवैकावधिकत्वात् भसंज्ञाया वाध्यते न च पदान्तविधिं प्रति न स्थानिवदिति स्थानिवत्त्व
निषेधो ज्ञावतरतीति विधि शब्दस्य भावसाधनस्य तत्राश्रयणात्॥ इह पदान्तस्य कस्यचिदविधेयत्वात्॥ पदहन्तप्रतिषेध इति पदस्य यद्धन्तं कार्यं तत्प्रतिषेध इत्यर्थः॥१०॥ राम०
८१

सिद्धमिति उत्तरपदस्याकालसमुदायत्वात् तद्धितोत्पत्त्यानजादेशतादृस्थ्यान्निवृत्तानुत्पत्त्यावधिकयामसंज्ञायाद्विविधापि पदसंज्ञा वाध्यत इति पदनिबंधनकार्याप्रसंगः ॥ अपत्ये दंचो घत्ते संज्ञा शाद्वैकदेशे लुप्ते संज्ञा स्वरूपानुपलंभात् कथं संज्ञिनोवगमः नहि यस्य देवदत्त इति संज्ञा कृता स देवशब्दाद् दत्तशब्दाद्वा प्रतीयते न चैकदेशेन समुदायोनुमीयते समुदाय स्त्वर्थस्य वाचक इति सुत्कृत्वा त्यपि तु मुच्चार्यमाणस्य प्रत्यापकत्वादेवं तद्धितेनु निष्पन्नत्वादव्ययवानामपि संज्ञात्वं तत्र वर्णानामनुनिष्पादिनां शास्त्रेणान्वाख्याना दसाधुत्वं । पदानामेवंतु संज्ञैकदेशानां साधुत्वमिष्यत इति लोपविधानद्वारेणा तदप्यनुज्ञायते । तद्वत् । तुल्यायामनुनिष्पन्नौ यौ ज्यां रव्यां इत्यसाधवः ॥ नत्वन्वाख्या

=देयसोऽइतिपाठः । ...

सिद्धमेकाक्षरपूर्वपदानामुत्तरपदलोपवचनात् ॥ सिद्धमेतत् कथं एकाक्षरपूर्वपदानामुत्तरपदस्य लोपो वक्तव्यः । वाचिकः । इह । पितर्हि प्राप्नोति । षडंगुलिः प्रदिक इति ॥ षष्षष्ठ्याजादिवचनात्सिद्धं । षष्ठ्याजादिवचनात्सिद्धमेतत् । अल्पे ह्रस्वे । किमर्थमिमावुभावर्थौ निर्दिश्येते । न यदल्पं ह्रस्वमपि तद्भवति ॥ यच्च ह्रस्वमल्पमपि तद्भवति ॥ नैतयोरावश्यकः समावेशः । अल्पं घृतं अल्पं तैलमित्युच्यते ॥ न कश्चिदाह ॥ ह्रस्वं घृतं ह्रस्वं तैलमिति ॥ तथा ह्रस्वः पटः ह्रस्वः शाटक उच्यते ॥ नहि कश्चिदाह अल्पः पटः अल्पः शाटक इति ॥ ०

=अन्वाख्यायकशास्त्रमित्यर्थः । अन्वाख्यायते इति क्रियत इत्यर्थः ।१= आदिवादित्समर्थतावति ।१=

यतेशास्त्रे नेषु दंतादिवत्स्मर्तिरिति ॥ दृष्टश्चायं लोके व्यवहारो यत्समुदायस्य संज्ञात्वे तदेकदेशः प्रयुज्यते तत्र समुदायस्य मुख्यसंज्ञात्वमवयवानां त्वनुनिष्पन्नत्वं अल्पे ॥ किमर्थमिति वं शादि ब्रल्पत्व ह्रस्वत्वयोः समावेशादर्शनादन्यतरोपादाने न सिध्यतीति प्रश्नः ॥ न कश्चिदाहाल्पः पट इति ननु चोच्यत एव लोके ल्पः पट इति ॥ यद्यप्युच्यते ॥ तथाप्यायामविस्तारहीनोल्प उच्यते । यस्त्वायामहीनो विस्तीर्णश्च स ह्रस्व उच्यते न त्वल्पोऽपि तु महान् ॥ ॥ ॥

कुटीपुंवद्वचनमिति प्रकृतिप्रत्ययसमुदायस्यायं पुंवत्भावो न तु प्रकृतेरिति स्त्रीप्रत्ययो न निवर्त्तते ॥ वत्सोक्षार्षभेभ्यश्च तनुत्वे इति तनुत्व इति सामान्येनोपादानात् इति प्रसंग इति भा
वः प्रत्ययगुणस्येति अंतरंगत्वात्प्रवृत्तिनिमित्तस्यैव तानवे प्रत्यय इति भावः किंप उपाध्यानर्थक्यमिति । अयं भावः द्वयोरित्यनर्थकं बहूनामपि निर्द्धारणे डतरच इष्टत्वाद्डत्रा

=तृतीयासमासे पुंवद्भावे स्त्रीकृतं लिंगं वचनं तादृशमेव न तु प्रत्ययानेकत्वेन स्त्रीप्रत्ययनिवृत्तिरित्यनेन भाष्यकृता=

कुटीशमीशुंडाभ्यो रः । कुटीशमीशुंडाभ्यः प्रत्ययसन्नियोगेन पुंवद्वचनं । कुटीशमीशुंडाभ्यः प्रत्ययसन्नियोगेन पुंवद्भावो वक्तव्यः ॥ कुटी कुटीरः । श
मी शमीरः शुंडा शुंडारः इति । किं पुनः कारणं न सिध्यति । स्वार्थिकोयं । स्वार्थिकाश्च प्रकृतितो लिंगवचनान्यनुवर्त्तंते ॥ उक्तं वा किमुक्तं । स्वार्थिका अतिव
र्त्तंते [illegible] पि लिंगवचनानीति ॥ वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे । वत्सादिभ्यस्तनुत्वे कार्श्येप्रतिषेधः । वत्सादिभ्यस्तनुत्वे कार्श्यप्रतिषेधो वक्तव्यः ॥
कृशो वत्सो वत्सतर इति माभूदिति । स तर्हि प्रतिषेधो वक्तव्यो न वक्तव्यः ॥ यस्य गुणस्य हि भावात् द्रव्ये शब्दनिवेशस्तदभिधाने त । सिन्नु सो वक्तव्ये प्रत्यये
न भवितव्यं । न च कार्श्यस्य भावात् द्रव्ये वत्सशब्दः किंप नत्ररो निर्द्धारणे द्वयोरेकस्य डतरच् । वा बहूनां जातिपरिप्रश्ने ॥ किमादीनां द्वयोरेकस्य प्रत्ययविधा
ना उपाध्यानर्थक्यं ॥ किमादीनां द्विबह्वर्थे प्रत्ययविधानाउपाधिग्रहणमनर्थकं । किंकारणं । बहिर्धारणमिति । यावता द्वयोरेकस्यैव बहिर्धारणं भवति
॥ अपर आह ॥ बहूनां जातिपरिप्रश्ने डतमजिति तत्र बहुग्रहणमनर्थकं ॥ ॥ निर्द्धारण १ ॥ ॥ ॥

=एषामाह कतमा एषामाढ्यतमा इति प्रकारे गुणवचनेनस्यादितिसूचनेनाव्ययप्रयोग ग्रहणानुकृतः ॥= =उक्तव्याख्याने भाष्यं न प्रसक्तं नहि तेन द्वयोरित्यस्य प्रत्याख्यानं लभ्यते अत आह अर्थ येति १=

तिपरिप्रश्नेपि कतमः शाकटदर्शनात् बहूनामित्यत्र जातिपरिप्रश्नग्रहणं न कर्त्तव्यं ॥ अथवा द्वयोरित्यस्य निर्द्धारणप्रयोजनत्वादेकस्येति न वक्तव्यं ॥ बहुग्रहणमिति डतमच उ
त्सर्गस्य द्वयोरेकस्य निर्द्धारणे डतरचोपवादस्य विधानात्बहूनामेव निर्द्धारणे डतमच् भविष्यतीत्यर्थः ॥ ॥ ॥ श्री ॥

=अर्थतामंथवस्येति॰अयंभावः॥परिप्रश्नस्यानिर्ज्ञातविषयत्वेपिअनिर्ज्ञातस्यवस्तुविषयत्वंयच्चसंख्याविषयःपरिप्रश्नः॥यच्चवस्तुगुणक्रियादिविषयःसपुनर्थेकविषयोपिभवति॰तदाहुःएकाहीति॰१=

किंकारणंकिमेतदितिसादिरिहायंग्रंथः॥किमःसंख्यापरिमाणेडतिचेत्यत्रसएवायंग्रंथइत्याद्युःनहीहसंख्याग्रहणमस्तियेना सग्रंथस्योपयोगःस्यादसंतासंबद्धश्चेहायंग्रंथः एकादि विषयस्यापिप्रश्नस्यसंभवात्कोभवान्कतरोभवतोःकठइति। अवक्षेपेकःएतयोरर्थयोर्विशेषइतियद्यपिककनोःस्वरभेदस्तथाप्यसत्यर्थभेदेकुत्सितेकश्चेत्येववक्तव्येनतुपृथग्योग द्वयं। पृथग्योगकरणान्नूनमनयोरर्थयोर्भेदःसतुननिश्चीयतइतिप्रश्नः॥अवक्षेपणमितियेनावक्षिप्यतेनिंद्यतेतद्वाचिनःकन्प्रत्ययोयस्तत्स्वयंकुत्स्यतेततःकइति

=यदीतिकेवलमवक्षेपणंलक्षणमर्थं॰यथामोघंभवान्प्रश्नायंवच्मतीयत्तत्स्यस्तेषांमधेयतमोमकोवाकठःसआगधप्रतिसेधंसमच...कोपीदत्वात्॰२=नहीहेति॰किमःसंख्यापरिमाणइत्यत्रेवमानिति...संख्याग्रहणेपरिप्रश्नस्यानिर्ज्ञातविषयतास्यवस्तुविषयताबहुना॰

किंकारणंकिमिसेतत्सपरिप्रश्नेववर्त्तते। परिप्रश्नश्चानिर्ज्ञाते। अनिर्ज्ञातंचबहुषुद्वयोर्वायोःपुनर्निर्ज्ञातं। निर्ज्ञातत्वात्द्वयेकयोःपरिप्रश्नोन। परिप्रश्नाभावात्कि मेवनास्ति कुतःप्रत्ययः। एकाच्चप्राचां॥प्राग्वचनं किमर्थंविभाषायथास्यात्॥प्राग्वचनानर्थक्यंचविभाषाप्रकरणात्। प्राग्वचनमनर्थकं किंकारणं विभाषाप्रकरणात्॥प्रकृतामहाविभाषातयैववक्तिद्धं॥अवक्षेपणेकन् [redacted] अवक्षेपणेकन्विधीयते॥कुत्सितेकः॥कःएतयोर्थयोर्विशेषः॥अवक्षेप णंकरणं। कुत्सितंकर्म अवक्षेपणंवैकुत्सितंकरणं। तेनयत्कुत्स्यतेतदपिकुत्सितंभवति। तत्रकुत्सितमित्येवसिद्धंभवति॥एवंतर्हियस्तरसकुत्सार्थमु पादीयतेतदिहोदाहरणंव्याकरणकेननामायंगर्वितः॥याज्ञिक्यकेननामायंगर्वितः॥यत्स्वकुत्सार्थमुपादीयतेतत्त्रोदाहरणं॥देवदत्तकोयज्ञदत्तकः॥

विषयविभागः॥अवक्षेपणंवैकुत्सितमिति नहिस्वयमकुत्सितमवक्षेपणंभवतीत्यवक्षेपणस्यापिकुत्सितत्वमस्तीत्यर्थः॥यस्तरस्यकुत्सार्थमितिव्याकरणादिकंस्वय मकुत्सितमप्याश्रयविशेषेमदमुपाहरदवक्षेपणंपरस्यभवतीतितद्वाचिनःकन्प्रत्ययः॥ ॥ श्री ॥१॥ ॥१॥

[illegible]

भा०कै०५
८१

लुम्मनुष्ये॥ लिंगसिद्ध्यर्थमपीति॥ वचनं त्वभिधेयवदेव भवतीति चंचेव मनुष्याविति न उक्तं हरीतक्यादिषु व्यक्तिरिति लुकि तु मनुष्यलिंगप्रसंगः॥ जीविकार्थे। यास्त्वेता इ
ति याः परिगृह्य गृहाद्गृहमटंति ता इत्यर्थः॥ यास्तु विक्रीयंते तेनास्तु न भवति शिवकान् विक्रीणीत इति॥ समासाच्च तद्विषयात्॥ इवार्थे छप्रकृत इति कस्यचिन्ना
म्नापरामर्श इति प्रश्नः आचार्यदेशीय आह। छ इति कथं पुनरिति सूत्रेणैव छस्य विधानात् छविषयस्यानुवादानुपपत्तिरित्यर्थः॥ एवं तर्हीवार्थ इति प्रधानस्यापि छस्य
परामर्शस्यायुक्तत्वात् गुणभूतस्यैवेवार्थस्य परामर्शः। छे च विधीयमाने अस्मादेव ज्ञापकादिवार्थे समासः स्यात् सप्तक्षपेति वा॥ समासेनोक्तत्वादिति वचनसामर्थ्यात्स्यादिति चे

=विक्रेतुं प्रतिमाः शिल्पवन्तो मौर्या इति विवरणकाराः। क्षत्रियविशेषास्तु प्रसिद्धाः॥२=

लुम्मनुष्ये। किमर्थं मनुष्ये लुबुच्यते॥ न लुगेवोच्येत। लिंगसिद्ध्यर्थं लुम्मनुष्ये। लिंगसिद्ध्यर्थं मनुष्ये लुबुच्यते। चंचेव चंचा वध्रिकेव वध्रिका। खर
कुटीव खरकुटी॥ जीविकार्थे चापण्ये अपण्य इत्युच्यते। तत्रेदं न सिध्यति॥ स्कंदो विशाख इति॥ किं कारणं। मौर्यैर्हिरण्यार्थिभिरर्चाः प्रकल्पिताः
भवेत्तासु न स्यात्। यास्त्वेताः संप्रति पूजार्थास्तासु भविष्यति॥ समासाच्च तद्विषयात्॥ तद्विषयेनेन किं प्रतिनिर्दिश्यते॥ छः॥ कथं पुनः समासो ना
म छविषयः स्यात् एवं तर्हीवार्थः यदि तर्हि समासोपीवार्थे प्रत्ययोपि। समासेनोक्तत्वात्प्रत्ययो न प्राप्नोति॥ एवं तर्हि द्वाविवार्थौ काकागमनमिव ताल

=समासार्थः काकागमनतालपतनसदृशो देवदत्तागमनदस्युपनिपातो। तद्धितार्थः काकवधसदृशो देवदत्तवधः॥

पतनमिव। काकतालं काकतालमिव काकतालीयं॥ ॥ ॥

=तद्धितार्थस्तु देवदत्तागमनदस्युपनिपातनिष्ठकार्यनिरूपके काकागमनतालपतनप्रयोज्यकाकवधसदृशो देवदत्तागमनदस्युपनिपातप्रयोज्यो देवदत्तवध इति॥२=

छस्त्री श्यामादिभ्यो निप्रसंगः॥ एवं तर्हीति शस्त्रीश्यामादौ नांतर्भूतेवार्थानामुपमेयप्रधानानामुपमेयान्तरेण संबंधाभावाच्छस्याप्रसंगः काकागमनमिवेति। द्वन्द्वनिवि
षये काकतालशब्दौ काकतालसमवेतक्रियावाचिनौ तत्र काकागमनं देवदत्तागमनस्योपमानं तालपतनं दस्युनिपातस्य तालेन तु यः काकस्य वधः स देवदत्तस्य दस्यु
ना वधस्योपमानमिति वधादिः काकतालीयादिशब्दवाच्यः संपद्यते॥ ॥ श्री ॥ ॥

राम०
८१

अभि॰। अपो गोत्रादिति गोत्रे गणा। एवं शैब्यते। गोत्रे यो विहितोण् तदन्तेभ्यो भिजिदादिभ्यो यञ् यथा स्यात्॥ आभिजित इति एवं तत्र नक्षत्रेणायुक्तः काल इत्यण्॥ अ
परत्र सास्य देवतेति॥ गोत्रमिति च वक्तव्यमिति॥ एवमप्यते। गोत्रचरणाद्वुञि सत्र गोत्रग्रहणे स्वरितत्वात् गोत्रे कुंजादिभ्यश्च्फञ्जिति गोत्राधिकारे विहितप्रत्यय
[redacted] स्याग्रहणे सत्यस्य पञ्जोग्रहणं न स्यात् गोत्रत्वातिदेशान्न भवति आभिजितक इति आभिजित्यस्यायमिति वुञ्। आपत्यस्य च तद्धिते नातीति यल्लोपः गो

=गोत्रसंज्ञकः प्रत्ययो भवतीति वक्तव्यमित्यर्थः।१८ [redacted]

अभिजिद्विदभृच्छालावत्। अपो गोगोत्रात् गोत्रवचनं कर्त्तव्यं। गोत्रादिति वक्तव्यं। इहमाभूत्। आभिजितो मुहूर्त्तः आभिजितः स्थाली
पाक इति। गोत्रमिति च वक्तव्यं। किं प्रयोजनं। आभिजितकः गोत्राश्रयो वुञ् यथा स्यात् गोत्रमिति शक्यमकर्त्तुं। कथमाभिजितकः।
गोत्राद्यं स्वार्थिको गोत्रमेव भवति॥ ॥ इति श्रीभगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये पंचमस्याध्यायस्य तृतीयेपा
१ दे द्वितीयमान्हिकं॥ पादश्च समाप्तः॥ ॥ ॥ ॥

त्यस्यमिति गोत्रचरणाद्वुञि सत्र गोत्रग्रहणेनार्थोगृह्यते॥ तेन तद्धाचिनः प्रत्ययो विधीयमानो स्मादपि यञो भवति गोत्राधिकारे विहितप्रत्ययग्रहणे त्वौ
पगवक इत्यादावणाद्यन्ताद्वुञ् न स्यात्॥ ॥ इत्युपाध्यायजय्यटपुत्रकैयटकृते भाष्यप्रदीपे पंचमस्याध्यायस्य तृतीयपादे द्वितीयमान्हिकं॥ पादश्च समाप्तः॥

भा० कै० ५ पादशतस्य पादशतग्रहणमिति द्वौ द्वौ माषौ ददातीत्यादावतिप्रसंगो न भवत्यनभिधानात्। यस्येति लोपेन सिद्धे पुनर्लोपविधानमपरनिमित्त कत्वार्थं। तेन लोपस्यास्था
९२ स्थानिवत्त्वाद् द्विपदिकेत्यादौ पादः पदिति पद्भावः सिध्यति। स्थूला। चंचुत्क इति। सादृश्यस्य द्योतकः कन्प्रत्ययः। चंचं चन्त्यपि यश्चंच निवृत्तश्चानेन। चंचत्को यथामतिः स्वं दृश्मा
नप्रभत्वात् प्रवृद्धहन्ता पि वृहन्ति वृषस्तमत्वा घोदृश्यतेस्य वृहत्कः अनसं भिन्नतरकमिति भेदस्य प्रकर्षानसंतगत्सोर्धुगपद्विवक्षायां पूर्वविप्रतिषेधात्तरपि कृते कांतत्वा

पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च पादशतग्रहणमनर्थकमन्यत्रापि दर्शनात्। पादशतग्रहणमनर्थकं किं कारणं। अन्यत्रापि दर्शनात्॥
अन्यत्रापि हि वुन्दृश्यते। द्विमोदकिकान्ददाति। स्थूलादिभ्यः प्रकारवचने कन्। कन्प्रकरणे चंचत्वृहतोरुपसंख्यानं॥ कन्प्रकरणे चंच द्वृहतो
रुपसंख्यानं कर्त्तव्यं। चंचत्कः बृहत्कः। अनत्यंतगतौ क्तात्तमादयः पूर्वविप्रतिषिद्धं॥ अनत्यंतगतौ क्तात्तमादयो भवंति पूर्वविप्रतिषेधेन। अन
त्यंतगतौ क्तात् कन्भवतीत्यस्यावकाशः। अनत्यंतगते वचनं प्रकर्षस्यावचनं। छिन्नकं भिन्नकं। तमादीनामवकाशः प्रकर्षस्य वचनमसं
तेगते रवचनं॥ पटुतरः। पटुतमः। उभयवचने उभयं प्राप्नोति। भिन्नतरकं। छिन्नतरकं तमादयो भवंति पूर्वविप्रतिषेधेन तदंताच्च स्वार्थे
×अनत्यंतगतौ क्ता ×३ (कन्वचनं। तदंताच्च स्वार्थे कन्वक्तव्यः भिन्नतरकं छिन्नतरकं॥ ॥ ॥
=अनत्यंतगतिद्योतकसंबंधस्तदभावोनसंतगतिः।१=भिन्नकमित्यादौ बहिरंगमित्यादि विर्था।२=
मा वाल कन्न प्राप्नोतीत्याह॥ तदंताच्चेति स्वार्थे पुनरनत्यंतगतियुक्त एव न तु प्रकर्षयुक्तः प्रकर्षे हि स्वार्थे कनि सत्यनत्यंतगतिर्न द्योतिता स्यात् नन्वेष स्वार्थमात्रे कन्न प्रतिपादितो राम०
दृश्यते चासौ यथैवं सूत्रमभिन्नतरकं भवति बहुतरकं व्याप्यते सकरतरकं मन्यत इति॥ ॥ श्री ॥१॥ ॥ ९२

एवं तर्हि न स्वामिवचन इति प्रतिषेधेन स्वार्थिकः कन्नस्तीति ज्ञाप्यते न हि स्वामिकृतादिभ्यो न संततगतौ क्तादिसम्यक्कनः प्रसंगो। समासे स्वामिवचने नैवान संततगतेर्द्योतनात्। समा
से प्यसक्तं क्तांतत्वाभावाच्च कृतग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति वचनात्स्वामिशब्दस्य गतिकारकत्वाभावात्॥ तस्मात्स्वार्थिकस्यैवासौ कनो निषेधः स्वार्थिकं कनं ज्ञापयति॥
अपि विग्रहाभावादिति। अन्यत्र विग्रहपूर्विका वृत्तिर्दृश्यते यथा वोया वकः इति यत्र तु विग्रहो नेष्यते तत्र नित्यग्रहणं क्रियते। यथात्रैमेन्नि स्वमिति। इह तु महाविभाषाधिकारस्य
=ज्ञापकमिति। ननु न स्वामीति सूत्रस्य प्रत्याख्यानात् कथं ज्ञापकमिति चेन्न। तस्य भाष्यस्य पूर्वसूत्रविहितस्यैवायं निषेध इत्यर्थमात्रतात्पर्यकत्वात्। तत्र सूत्रे प्रकृत्यभिहितत्वादित्यस्य भाष्ये प्रकृतिस्वरूपेणैवेति तत्सामर्थ्यात् नाभिहितत्वादित्यर्थः। यावादेराकृतिग
नस्वामिवचने। स्वामिवचने प्रतिषेधानर्थक्यं प्रकृत्यभिहितत्वात्। स्वामिवचने प्रतिषेधोऽनर्थकः। किं कारणं। प्रकृत्यभिहितत्वात्। प्रकृत्याभिहितः सोऽर्थ इ
ति कृत्वा कन्न भविष्यति। अपर इत्याह शिं तेगु। अध्युत्तरपदात्प्रत्ययविधानानुपपत्तिर्विग्रहाभावात्। अध्युत्तरपदात्प्रत्ययविधेरनुपपत्तिः किं कारणं विग्रहा
भावात् विग्रहपूर्विका तद्धितोत्पत्तिः न चाध्युत्तरपदेन विग्रहो दृश्यते। तस्मादमिति सधीनरः। तस्मात्तत्रेदमिति सधीनरः प्रत्ययो कर्तव्यः राजनीदं राजा
धीनं यदि सधीनर् क्रियते सकारस्य इत्संज्ञा न प्राप्नोति इह च स्वाधीनोऽन्वधीन इत्संगस्येति इयङुवङौ स्यातां। सूत्रं च भिद्यते यथान्यास मेवास्तु॥ न
नु चोक्तं अध्युत्तरपदात्प्रत्ययविधानानुपपत्तिर्विग्रहाभावादिति। नैष दोषः। अस्ति कारणं येनात्र विग्रहो न भवति। किं कारणं। नित्यप्रत्ययोऽयं
" के पुनर्नित्यप्रत्ययः॥ " " "
न किंचिन्निवर्त्तकमस्तीति विग्रहः प्राप्नोति न चासौ दृश्यत इति प्रत्ययविधानं नोपपद्यत इत्यर्थः सूत्रमुपालभ्य न्यासांतरं पठति। तस्मात्तत्रेदमिति तत्र महाविभाषाधिका
रात्पक्षे वाक्यं भवति राजनीदमापन्नमिति पक्षे प्रत्ययः राजाधीनमिति भाष्यकारो न्यासांतरं दूषयति। यदीति। पदसंज्ञा च नलोपाद्यर्थमवश्यमभ्युपेया॥ "
त्वात् कतः। विभाषाः पक्षे स्वाधीनोऽध्यायत्तः। हन्याय... (margin, vertical)

भा०कै०५ तमादय इति अवक्षेपणे कनित्यस्मात् कनः प्रागित्यर्थः॥ भुक्त इत्युक्ते सामान्यशब्दत्वात् कर्तृस्यानवगमात् प्रकर्षाद्युपाधिद्योतनाय यावद्रूपप्रयोज्यास्तमादय इति
९३ सामर्थ्याज्ज्ञेनिसाः आमादय इति किमेतिङ् व्ययघादिसारूप्यतत्त प्रकृतवचनेमयडि सस्मात् प्रागित्यर्थः॥ बहुतीजा संता इति बहुवचननिर्देशादेतत्सूत्रविहितस्यय
हणं किं तर्हि प्रकृतिरितिप्रकृत्यभावात् प्रसयोपि न प्राप्नोति। एतच्च शौण्डादिषु धिशब्दस्य पाठमनपेक्ष्योच्यते एवं तर्हि बहुव्रीहिरिति रत्नि विषये साधनक्रियावा

=पाघादीनां चेत्यपि बोध्यं ९=

=बहुलाआख्यादेः आसंता खट्वं घुमीति च ९=

तमादयः प्राक्कनः। ज्यादयः प्राग्वुनः। आमादयः प्राङ्मयटः॥ बहुतीजा संताः समासान्ताश्चेति॥ एवं तर्हि नायं प्रत्ययविधिरुपाल
भ्यते॥ किं तर्हि प्रकृतिरुपालभ्यते। अथ तु नरपदा प्रकृतिर्नास्ति। किं कारणं। विग्रहाभावात्॥ विग्रहपूर्विका समासप्रवृत्तिः॥ न चाधिना
विग्रहो दृश्यते॥ एवं तर्हि बहुव्रीहिर्भविष्यति॥ किं कृतं भवति॥ भवति वैकश्चिद् दत्तपदविग्रहोपि बहुव्रीहिः॥ तद्यथा॥ शोभनं मुखमस्या
: सुमुखीति। नैवं शक्यं। इह मदधीनमित्यात्वं कृष्णप्रसज्येयातां। एवं तर्ह्यव्ययीभावो भविष्यति। एवमप्यधेः पूर्वनिपातः प्राप्नोति॥०॥

चित्वाद् धिशब्दस्य राजाधिकृतो यस्मिंस्तद्राजाधीनमिति बहुव्रीहिः करिष्यते विशेषणत्वविवक्षया च राजादीनां पूर्वनिपातः यदि त्वतिखट्वादिवद्राजानमधिगत राम०
इति तत्पुरुषः क्रियते तदाधेः पूर्वनिपातः स्यात्। कश्चेत्यिक्रोपाद्धिभाषे सनेन तस्मिंश्च सस्तुत्तरपदत्वाभावात् खो न स्यात्। एवमप्यधेरिति यथाधिस्त्रीति॥ ॥ ९३

=अधिकरणएतस्मिन्केनाधेयाविभावेनतत्वात्सामर्थ्यादाधेयंलक्ष्यतेऽव्ययीभावः।१=

राजदंतादिष्विति ननु विभक्त्यर्थे वृत्तेरधेरव्ययीभावो विधीयमानोधिकरणप्रधानः स्यात्त्वाधेयप्रधानः नैष दोषः साहचर्यादाधेयप्रधानो भविष्यति खमन्त्ययेच कृते कुटीर दिव
घ्यर्थे स्त्रीलिंगसंख्यं भविष्यति राजदंतादिषु चाधेयेधिरिस्येवं विशिष्य पठितमंतेनाधिस्त्रीत्यादावधिकरणपदार्थे परनिपाताभावः॥ अधिशौंडादिष्विति अधिरीश्वर इति अधेःक
र्मप्रवचनीयत्वाद्यस्य चेश्वरवचनमिति सप्तम्यंता राजादयोधिना समस्यंते एवं च वाक्यमपि भवति यथाधिब्रह्मदत्ते पंचाला इत्येवं राजन्यधि राजाधीनमिति वृत्तिविषयेचाधि
शब्द ईशितृमेव वर्त्तते॥ अथवाधिकरण एव सप्तमी वृत्तिविषये च स साधनक्रियावचनोधिर्न तु वाक्य इत्यस्य पदेनाग्रहो राजन्यधिकृतं राजाधीनं राजायत्तमित्यर्थः॥ विभा

राजदंतादिषु पाठः करिष्यते॥ अथवा सप्तमीसमासोयं॥ अधिः शौंडादिषु पठ्यते। अपरस्त्वाह विभाषांचेरदिक्स्त्रियामित्यत्र दिग्ग्रहणं किमर्थं॥ अस्त्रियामिती
प्रसुच्यमाने प्राचीनाब्राह्मणी प्राचीना शिखेत्यत्रापि प्रसज्येत॥ दिग्ग्रहणे पुनः क्रियमाणे न दोषो भवति॥ [redacted] अथ स्त्रीग्रहणं किमर्थं॥ नयावता दिक्
शब्दः स्त्रीविषय एव भवति वैकश्चिद्दिक्शब्दः अस्त्रीविषयोपि॥ प्राक् प्राचीनं उदक् उदीचीनं॥ विभाषाऽञ्चेरदिक्स्त्रियांस्त्रीग्रहणं किमर्थं॥ न स्वार्थिको
यं॥ स्वार्थिकश्चप्रकृतितो लिंगवचनान्यनुवर्त्तंते॥ एवं तर्हि सिद्धे सति यत्स्त्रीग्रहणं करोति। तद्ज्ञापयत्याचार्यः॥ स्वार्थिका अतिवर्त्तंते लिंगवचनानीति।
किमेतस्य ज्ञापने प्रयोजनं। गुडकल्पा द्राक्षा॥ तैलकल्पा प्रसन्ना। पयस्कल्पा यवागूरित्येतत्सिद्धं भवति। णाचं स्त्रि॥ ॥ ॥

षांचे॥ इह विभाषाग्रहणं पूर्वस्य विधेर्निसत्वज्ञापनार्थं द्वयोर्विभाषयोर्मध्ये ये विधयस्ते नित्या इति न्यायात्॥ दिग्ग्रहणमिति॥ अंचसंतः स्त्रियां वर्त्तमानो दिश्यपि वर्त्तेत इति प्रश्नः प्रा
ची नाब्राह्मणीति क्रियानिमित्तको दिग्देशकालनिमित्तको वा ब्राह्मण्यादौ स्त्रियां वर्त्तेत इति खस्य प्रतिषेधाभावः॥ प्रागिति प्राचीशब्दाद्दिग्वाचिनो दिक्शब्देभ्य इत्यस्तातेरस्यन्न
स्यांचेर्लुगिति लुक्कृते तोव्ययत्वात्स्त्रीत्वाभावः खेतु कृते शब्दांतरत्वान्नपुंसकत्वं॥ ॥ श्री ॥१॥ ॥१॥ ॥

भा॰कै॰५ एकस्यसकृद्दादेशइति॥ अभ्यावृत्तिगणनेसकृच्छब्दस्यासामर्थ्यात्पुनःपुनरावृत्तिः क्रियायाः क्रियाभ्यावृत्तिस्तद्गुणनेवर्त्तमानात्संख्याशब्दात्कृत्वसुजिष्येवं पूर्वसूत्रार्थेमाश्रित्ये
१६४ दमुच्यतेयदात्वभिमुखीवृत्तिरभ्यावृत्तिर्जन्मलक्षणोच्यतेतदात्तदनुवृत्तावपीहदोषाभावः अस्मिन्पक्षेधात्वर्थस्यानुवादकआह। यथा अधिपरीअनर्थकाविति। अभिमुखी
वृत्तिरभ्यावृत्तिरित्यर्थेनदोषइति प्रश्नः नचैकस्येति ननुचैकस्यैवपुनःपुनरावृत्तिर्यथापंचकृत्वोभुंक्तइति॥ एकैवात्रभुजिक्रियानिवृत्तमेदाआख्यातेनाभिधीयतेतस्यापं
चावृत्तयःपंचसंख्ययागण्यंतेसत्यमेवमेतत्॥ अयंत्वत्रार्थः नचैकस्यपुनःपुनरावृत्तिर्भवतीतिइहसकृद्भुंक्तइतिभोजनमेककालंविवक्षितंतस्यैककालस्यैकशब्दवाच्यस्य काल
लभेदादप्यलब्धभेदस्यपुनरावृत्त्यसंभवात् अभ्यावृत्त्यभावस्तत्रयथासाधुपचतीतिभवसेवमेकंभुंक्तइतिप्राप्तेसकृच्छब्दप्रयोगार्थमिदंसूत्रं। अथक्रियाग्रहणमितिप्रधाने

एकस्यसकृच्च। सकृदादेशोऽभ्यावृत्तिग्रहणंनिवृत्तं। किंप्रयोजनं। पुनःपुनरावृत्तिरभ्यावृत्तिः। नचैकस्यपुनःपुनरावृत्तिरभ्यावृत्तिः[redacted]
भवति॥ अथक्रियाग्रहणमनुवर्त्ततेउताहोन किंचार्थोनुवृत्त्या। वाऽमर्थः। इहमाभूत्॥ एकोभुंक्तइति अथानुवर्त्तमानेपिक्रियाग्रहणेइहकस्मान्न
भवति॥ एकःपाकइति। पूर्वयोश्चापियोगयोःकस्मान्नभवतिद्वौपाकौत्रयःपाकाः चत्वारःपाकाःपंचपाकाःदशपाकाइतिपरिहृतमेतत्॥ ॥

=वैवकस्यपाकस्वंब्धर्थमतभाऽनजेरादिति॥

निवर्त्तमानेगुणस्यापिनिवृत्त्यामाव्यमितिमत्वाप्रश्नः किंचार्थ्यपरिप्रयोजनमस्तितनुःस्वरितत्वात्क्रियाग्रहणंनिवर्त्तमानेप्यभ्यावृत्तिग्रहणेनुवर्त्तिष्यतइतिभावः एकोभुंक्तइति
अनेकोपिभुंक्तइति तन्निवृत्त्यर्थंएकशब्दप्रयोगः अनुवर्त्तमानेपीतियथातुमुण्वुलौक्रियायांक्रियार्थायामित्यादिषुक्रियाप्रदेशेषुपाकादेर्ग्रहणंभोक्तुंपाकइत्यादिसिद्ध्य
र्थे [redacted]तथेहापिग्रहणेनभाव्यमितिमत्वाप्रश्नः द्वौपाकावितियदेकमेवपाकंद्विष्ककृतदैतउदाहरणंस्कवर्णास्यद्वौपाकाविति एवं राम॰
ह्यभ्यावृत्तिर्भवतितदैदाच्चपाकस्यभेदोयदानुपाकस्यभेदस्तदाभ्यावृत्त्यभावादेवपूर्वयोगाभ्यांप्रसंगः॥ ॥ २४

नैतत्क्रियागणनमिति । अभ्यावृत्तिग्रहणादेव क्रियासंप्रत्ययः सिद्धो न हि द्रव्यगुणयोः स्वभावसिद्धयोः शब्देन प्रतिपाद्यमानयोः [illegible]रभ्यावृत्तिं संभवति साध्यार्थवि
षयत्वात्तस्याः तस्मात्क्रियाविशेषप्रतिपत्त्यर्थं क्रियाग्रहणं कृतं तेन साध्यस्वभावैव क्रिया गृह्यते पाकादिभिः शब्दैः सिद्धस्वभावाभिधीयते सिद्धतायां घञादिविधाना
त् यद्यपि धातुनात्र साध्यस्वभावा क्रियाभिधीयते तथापि प्रत्ययार्थप्राधान्यात्साध्यत्वं गम्यते इति क्रियाग्रहणादिह सिद्धताधर्मयुक्तपाकाद्यग्रहो यत्र तु धातुवाच्या क्रि

नैतत्क्रियागणनं । किं तर्हि द्रव्यगणनमेतत् । कथं कृत्वसुचभिहितो भावो द्रव्यवद्भवतीति । इहापि तर्हि १ द्रव्यगणनान्न प्राप्नोति सकृद्भुक्त्वा सकृद्भो
क्तुमिति । पूर्वयोश्चापि योगयोः द्विर्भुक्त्वा द्विर्भोक्तुं पंचकृत्वो भुक्त्वा पंचकृत्वो भोक्तुं दशकृत्वो भुक्त्वा दशकृत्वो भोक्तुमिति द्रव्यगणनान्न
प्राप्नोति । यदि खल्वपि पुनःपुनरावृत्तिरभ्यावृत्तिर्द्विरावृत्तेः सकृदिति स्यात् । त्रिरावृत्तेर्द्विरिति । एवं तर्ह्यनुवर्तते अभ्यावृत्तिग्रहणं न
१ तु पुनःपुनरावृत्तिरभ्यावृत्तिः ॥ ॥ ॥ ॥

याश्रयं पाकादिष्वपि कार्यं भवति । यादृशी च पूर्वे सूत्रे क्रियागृहीता तादृश्येवेहानुवर्तते इत्येकः पाक इत्यत्राप्ययं परिहारः उपपन्नः यथोक्तन्यायमप्रतिपद्यकृदभिहित इति सामा
न्येनाभिधानान्नात्र घञादीनामव्ययकृतां च विशेषमनुष्याद्दृष्ट्येति इहापि तर्हीति दोषान्तरं चाह यदि खल्वपीति ॥ आद्या हि क्रियाप्रवृत्तिरभ्यावृत्तिर्न भवति ॥ ॥ ॥

=आवृत्तिरभ्यावृत्तिर्द्वितीयादिप्रवृत्तौ वक्तव्यादिति भावः १०=

=इतिप्यवहारैरित्यर्थः।१= नन्वेवमपि रसंनयापेक्षत्वादभिमुख्यस्यैकप्रवृत्त्यावगावाक्यमत्राभिवर्ततमस्तुकिरत्याह·सक्तादीति·स्वरूपमात्रोक्तेः वचनकारत्वान्मतीत्यर्थः।२ =प्रवृत्तयइति·जन्मानीत्यर्थः।एकसाध्यमात्रित्वेनैवतदर्थप्रति·भिन्नकर्तृकर्मत्वेऽभ्यावृत्तिव्यवहाराभावइति·१=

=ननुगणनेवृत्तिःसंख्याशब्दानामेवनिर्दिष्टत्वसंख्याग्रहणंच्यर्थमतआह·पूर्वसूत्रइति·अनियतेति·अनियतसंख्याविशेषवाची इत्यर्थः।४=ननुगणनग्रहणंव्यर्थंयावतासंख्यागणनात्मिकेकिंचप्रतवारा... इत्यर्थः·वावरादेगाभ्यावृत्तेरुक्तत्वेनसंख्याग्रहणंस्यात

भा०कै०५ किंतर्ह्यभिमुखीति एतच्चाभिग्रहणाल्लभ्यते अन्यथा क्रियावृत्तिगणनइतिब्रूयात् वो चेति अस्ति हि तासां प्रवृत्तीनामेकसाधनानां परस्परापेक्षा एतावत्स एताः प्रवृत्तय

९५ इति सकृद्भुंक्त इत्यादौ लेकस्या अपि प्रवृत्तेः स्वरूपलाभं प्रत्यभिमुख्यमस्ति॥ द्रव्यवदपीति। यथा द्रव्यं लिंगसंख्यासाधनैः संबध्यते तथा घञाद्यभिहितो भाव इत्यर्थः अ

व्ययकृदभिहितस्तु भावो लिंगसंख्यासाधनसंबंधाभावात्साध्यस्वभाव एव प्रतीयते न तु सिद्धस्वभाव इति क्रियावदेवासौ भवति न तु द्रव्यवदिति तत्र क्रियाभ्यावृत्तिसद्भावा

द्भवत्येव प्रत्ययः अविप्रतिपत्तिविषयाख्यातवाच्यक्रियापेक्षश्च क्रियावदितिसतिदेशः पूर्वसूत्रे संख्याग्रहणमनियतविशेषवाचिभूयःप्रभृतिनिवृत्त्यर्थं तेहि बहुगणशब्दाभ्यां

त्रियमार्थाभ्यां संख्याप्रदेशेषु निषिद्धग्रहणाः॥ अभ्यावृत्तिग्रहणं किमर्थं पंचपाका इत्यत्र क्रियामात्रगणने माभूदभ्यावृत्तियहणे च क्रियमाणे क्रियाग्रहणं क्रियाविशेषो

किंतर्हि अभिमुखी प्रवृत्तिरभ्यावृत्तिः पूर्वा च परे प्रत्यभिमुखी परे च पूर्वां प्रत्यभिमुख्यौ। यदप्युच्यते अनुवर्तमानेपि क्रियाग्रहणे इह कस्मान्न भवति॥ एकः पा

क इति पूर्वयोश्चापियोगयोः द्वौ पाकौ त्रयः पाकाः चत्वारः पाकाः पंचपाकाः दशपाका इति। परिहृतमेतत्। नैतत्क्रियागणनं किं तर्हि द्रव्यगणनमेतत्॥ कृदभिहि

तो भावो द्रव्यवद्भवतीति॥ ननु चोक्तमिहापि तर्हि द्रव्यगणनान्न प्राप्नोति सकृद्भुक्ता सकृद्भोक्तुमिति पूर्वयोश्चापियोगयोः॥ द्विर्भुक्त्वा द्विर्भोक्तुं पंचकृत्वो भुक्त्वा

पंचकृत्वो भोक्तुं दशकृत्वो भुक्त्वा दशकृत्वो भोक्तुमिति द्रव्यगणनान्न प्राप्नोति। नैष दोषः क्रियागणना भविष्यति कथं। कृदभिहितो भावो द्रव्यवदपि क्रियावदपि॥

=तथालंभनक्रियायाःप्रतिपन्नत्वस्तुतोऽभ्यावृत्तिर्मतेपिसप्तदशपदस्यगननवृत्तित्वमितियाज्यं·तदभावेऽभ्यावृत्तिविषयेसंख्यावाचकात्सप्रत्ययेत्यर्थःस्यादितिनआवात्।४=

गृह्यते नान्यथा तद्देवं यदेकस्या एव क्रियायाः जन्मलक्षणाः प्रवृत्तयो गण्यंते तदा कृत्वसुजादयो भवंति नान्यदा। यदि तर्हि घञाद्यंतप्रयोगे कृत्वसुजादयो न भवंति कथं द्विराहृत्तिः

द्विःप्रयोगो द्विर्वचनमित्यादयः प्रयोगाः द्विर्वचनेचीति ज्ञापकात्क्वचित् घञाद्यंतप्रयोगेपि कृत्वोर्थप्रत्ययो भवतीत्यदोषः। गणनग्रहणं यत्र साक्षादभ्यावृत्तिगणनं तत्र प्रत्ययार्थं

मन्यथा क्रियाभ्यावृत्त्याविरुच्यमाने सप्तदश प्राजापत्यानजांस्तूपराने कवर्णानालभेतेत्यत्राप्यालंभनक्रियाया अभिमुख्येन प्रवृत्तिसंभवात् साधनभेदसामर्थ्याप्रति राम०

पन्नभेदालंभनक्रियाभ्यावृत्तिविषये साधनगणनवाचिनोपि सप्तदशशब्दात्प्रत्ययः स्यात् इह पंचकृत्वः पाक इत्यादौ करोत्यादिक्रियापेक्षः प्रत्ययः यथा पंचकृत्वः पटोकृत इति॥ ९५

=किमेतदतिरेकः।१=

देवतां॥ नहिपितरइतिदेवताशब्दस्य जातिविशेषवाचित्वाद्भिन्नजातीयाभिधायिना सामानाधिकरण्याभावात्समासाभावात्प्रकृतिरेव नास्ति कुतः प्रत्ययइत्यर्थः॥ दि

देवतांतान्नाद्यर्थेयत् देवतांतादिसुच्यते॥ तत्रेदं नसिध्यति। पितृदेवत्यमिति॥ नहिपितरोदेवता॥ नैषदोषः दिवै
रैश्वर्यकर्मणो देवः तस्मात्स्वार्थेतल् एवं चकृत्वा देवदेवत्यमपि सिद्धं भवति॥ देवात्तल्॥ तलिस्त्रीलिंगवचनात
लिस्त्रीलिंगवक्तव्यं॥ देवता॥ किंपुनः कारणं नसिध्यति॥ देवशब्दोयं पुल्लिंगः स्वार्थिकश्चायं॥ स्वार्थिकाश्चप्र
कृतितो लिंगवचनान्यनुवर्त्तंते॥ उक्तं वा॥ किमुक्तं स्वार्थिका अतिवर्त्तंतेपि लिंगवचनानीति॥ ॥ ॥
ति१

वेरिति। क्रियाशब्दोदेवताशब्दो ननु जातिवाची सत्यर्थः॥ देवदेवत्यमितिजातिशब्दत्वेतु देवताशब्दस्य द्वयोः पर्यायत्वाद्युगपत्प्रयोगो नस्यात्॥ ॥ ॥

१८ ॥श्री ॥७॥ ॥श्री श्री श्री

भा॰कै॰५
९६

लोहिता। लोहिता इति॥ प्रतिपदविधेर्बलवत्त्वात् सर्वमेव कन्स्यात्। तथा च लोहितिके ति न सिध्येदिति वचनं निःसे लिङ्गार्थप्रत्ययवाधे प्राप्ते विकल्पार्थं। स्वार्थविज्ञानात् सिद्धमिति।

=लोहितशब्दात्... लोहितिका ... =उअयअय अथ ... अक्षरसमूहे छन्दस उपसंख्यायते। ... अपरो मनो ... ४=...

लोहितान्मणौ। लोहिता तल्लिंगबाधनं वा। लोहिताल्लिंगबाधनं वेति वक्तव्यं। लोहितिका लोहिनिकेति॥ अक्षरसमूहे छन्दस उपसंख्यानं॥ अक्षरसमूहे छन्दस उपसं-

ख्यानं कर्तव्यं। आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं येयजामह इति पंचाक्षरं यजेति द्व्यक्षरो वषट्कारः। एष वै सप्तदशाक्षरः छन्दस्यः प्रजापतिर्यज्ञमनुवि-

हितः॥ छन्दसि बहुभिर्वसव्यैरुपसंख्यानं कर्तव्यं॥ हस्तौ पृणस्व बहुभिर्वसव्यैः॥ अग्निरीशे वसव्यस्येति। उक्तं स्वार्थविज्ञानात् सिद्धमिति। अपस्यो वसानाः अ-

पो वसानाः स्व ओकः स्वोकः कव्यो सि हव्यसूदनः। कविरसि। रौद्रेणानीकेन कव्यनायै कवितायै॥ आमुष्यायणस्य॥ अमुष्यपुत्रस्य॥ क्षेम्यस्येशे क्षेम्यम ध्यवस्यति

वा पुर्वर्चसं वर्चसे एव वर्चस्यं। निष्केवल्यं। निष्केवलं॥ उकथ्य। उकथ्यं जन्यं ताभिः सजन्यं ताभिः जनंताभिः सोमे जैनयामि न कव्यं नवं॥ प्राणो नव्ये भिर्नवैः ब्रह्म पूर्व्यं

पाथः पूर्वं तनुषु पूर्व्यं पूर्वं पूर्व्या हः पूर्वाहः पूर्व्या विशः पूर्वा सः पूर्वासः समपूर्व्येः समपूर्वैः॥ अग्निं वः पूर्वं पूर्व्यं तं जुषस्व यविष्ठ्य यविष्ठ। होत्रवाहं यवि-

ष्ठ्यं। यविष्ठं त्वं हव्य यघविष्ठ्य यविष्ठ समावद्वसति॥ समावद्वसन्तीति समं वसन्ति समंगच्छन्ति॥ स वो देवयते हस्तौ समं समावद्वीर्या वहानि समानि समावद्वी-

र्याणि करोति॥ समानि। य ईवते लोके॥ य ईवते ब्रह्मणः। य इवते। नवस्य नू नप्त्रन पूर्वाश्च। नवस्य नू इत्ययमादेशो वक्तव्यः। नप्त्रन पूर्वाश्च प्रत्यया वक्तव्याः

॥ नूत्नं नूतनं नवीनं। तश्च पुराणे प्रात वक्तव्यः॥ नप्त्रन पूर्वाश्च प्रत्यया वक्तव्याः प्रत्नं प्रणं प्रतनं प्रीणं॥ ॥ ॥ ॥

=ञवतुः प्रत्ययः। ३२=

वसोः समूहे च सत्रोक्तं। अपस्यो वसाना इति। अपशब्दात् द्वितीया बहुवचनं तादात्म्यसंयोविभक्तेश्चालुक्॥ ॥श्री ॥७॥ ॥७॥ ॥

एम॰
९६

=बसाः इति योगविभागात् स्वार्थे प्रत्ययः। ...

तद्युक्तात्॥ यदेव वाचेति॥ इदं त्वया कर्तव्यमिति संदेशवाचं श्रुत्वा यत्कर्म क्रियते तत्कार्मणमित्यर्थः॥ श्री ॥७॥ श्री ॥७॥ ॥

=सान्नाय्यग्रहणं नो दाभार्थं· इयं तु पाठ्यमान्नाय्यं तेष्वपि इदं·॥=

तद्युक्तात्कर्मणोऽण्। तदिति नेनेन किं प्रतिनिर्दिश्यते॥ वागेव। यदेव वाचा व्याक्रियते तत्कर्मणा क्रियते॥ अण्प्रकरणे कुलालवरुडनिषादचण्डालामित्रेभ्यः छन्दसि॥ अण्प्रकरणे कुलालवरुडनिषादचण्डालामित्रेभ्यश्छन्दस्युपसंख्यानं कर्तव्यं। कौलालः वारुडः। नैषादः चाण्डालः। आमित्रः॥ भागरूपनामभ्यो धेयः॥ भागरूपनामभ्यो धेयो वक्तव्यः॥ भागधेयं रूपधेयं नामधेयं मित्राच्छन्दसि धेयो वक्तव्यः। मित्रधेये यतस्व॥ अण् मित्राच्च। अण् मित्राच्चेति वक्तव्यं॥ मैत्रं मित्रः॥ सान्नाय्यानुजावरानुषूकचातुष्प्राश्यराक्षोघ्नवैयातवैकृतवारिवस्कृताग्रायणाग्रहायणसान्तपना निपात्यन्ते॥ सान्नाय्यः अनुजावरः अनुषूकः चातुष्प्राश्यः राक्षोघ्नः वैयातः वैकृतः वारिवस्कृतः॥ आग्रायणः॥ आग्रहायणः। सान्तपनः॥ आग्नीध्रसाधारणादञ्॥ आग्नीध्रसाधारणादञ्वक्तव्यः॥ आग्नीध्रं। साधारणं॥ अयवसमरुद्भ्यां छन्दस्यञ्वक्तव्यः। आयवसे वृद्धे तेमारुतं शर्द्धः॥ नवसूरमर्तयविष्ठेभ्यो यत्। नवसूरमर्तयविष्ठेभ्यो यद्वक्तव्यः॥ सूर्यः मर्त्यः। यविष्ठ्यः॥ क्षेमाद्यः क्षेमाद्यो नवः॥२॥

क्रमः॥ क्षेम्यस्तिष्ठन्प्रतरणः सुवीरः॥ बह्वल्पार्थाच्छस्कारकादन्यतरस्यां॥ बह्वल्पार्थात् मंगलामंगलवचनं॥ बह्वल्पार्थान्मंगलामंगलवचनं कर्तव्यं॥ बहुशो देहि। अनिष्टेषु श्राद्धादिषु माभूत्॥ इष्टेषु प्राशित्रादिषु यथा स्यात्॥ अल्पशो देहि॥ इष्टेषु प्राशित्रादिषु माभूत्॥ अनिष्टेषु श्राद्धादिषु यथा स्यात्॥ प्रतियोगे पञ्चम्यास्तसिः तसिप्रकरणे आद्यादिभ्य उपसंख्यानं कर्तव्यं। आदितः मध्यतः अन्ततः॥ ॥७॥ ॥ ॥

=क्षेम्यस्तेयोऽन्यगिरुर्वन्हे वचनं तु पतसकरणमध्ये पाठात्तत्वं निनार्थमिति मतीयते·॥=

रामरामराम॥ श्री श्री ॥ श्री ॥७॥ ॥श्री श्री ॥७॥ ॥७॥

भा॰कै॰५ कृभ्वस्ति। च्विविधाविति। अभूततद्भावग्रहणं वार्त्तिके दृष्ट्वा सूत्रे प्रक्षिप्तं संपद्यन्ते अस्मिन्निति। अमूलाभवंति। संपद्यकर्त्तरि च्विरिति च्विप्रसङ्गः। एतच्चोपलक्षणं कृभ्वस्तियोगा
९७ भावादरच्चेत्प्रसङ्गः तस्मादिदमुदाहरणं। भवंत्यस्मिन्क्षेत्रे शालय इति॥ प्रकृतिविवक्षाग्रहणं चेति। तेनात्र प्रकृतेरविवक्षितत्वाच्चेरभावः। यदा तु प्रकृतिरेव विकारात्मना संपद्य
माना विकारभेदेन भवनक्रियायां कर्त्री विवक्ष्यते तदा च्विप्रत्ययः। अंकुरीभवंति यवा इत्यत्राभूततद्भाव एव प्रकृतिविवक्षाग्रहणेन व्याख्यात इत्याहुः। अन्ये न रूपेण प्रागभूतं

कृभ्वस्तियोगे संपद्यकर्त्तरि च्विः। च्विविधावभूततद्भावग्रहणं कर्त्तव्यं। इह मा भूत्। संपद्यन्ते शालय इति। अथ क्रियमाणेपि वै अभूततद्भावग्रहणे इह कस्मान्न भव
ति। संपद्यन्तेऽस्मिन्क्षेत्रे शालय इति। प्रकृतिविवक्षाग्रहणं च। प्रकृतिविवक्षाग्रहणं कर्त्तव्यं। समीपादिभ्यः उपसंख्यानं कर्त्तव्यं। समीपीभवति। अभ्याशीभव
ति। अंतिकीभवति। किं पुनः कारणं न भवति। न ह्यसमीपं समीपं भवति। किं तर्हि असमीपस्थं समीपस्थं भवति। तत्तर्हि वक्तव्यं। न वक्तव्यं। तास्थ्यात्ताच्छब्द्यं
भविष्यति। अव्यक्तानुकरणात्। किमर्थश्चकारः स्वरार्थः। चितोंत उदात्तो भवतीत्यंतोदात्तत्वं यथा स्यात्। नैतदस्ति प्रयोजनं। एकाजयं तत्र नार्थः स्वरार्थेन च
कारेण। अनुबंधेन प्रत्ययस्वरेणैव सिद्धं। अत उत्तरं पठति। डाचि चित्करणं विशेषणार्थं। डाचि चित्करणं क्रियते। विशेषणार्थं। क्व विशेषणार्थेनार्थः। लोहितादिडाज
भ्यः क्यषिति। डा इति उच्यमाने इडा इतोपि प्रसज्येत। अर्थवद्ग्रहणे नानर्थकस्येति। एवमेतस्य न भविष्यति। इदं तर्हि नाभा पृथिव्या निहितो दविद्युतत्। तस्मा
च्चकारः कर्त्तव्यः। मद्रात्परिवापणे। मद्राच्चेति वक्तव्यं। मद्राकरोति। समासांताः। अंतग्रहणं किमर्थं। अंतो यथा स्यात्॥ ॥ ॥

कारणं तेन रूपेणासत्त्वमभावोऽभूततद्भाव इत्याश्रयणादतिप्रसंगाभावः। संपद्यकर्त्तृत्वादेवाभूततद्भावत्वे पुनस्तदुपादानाद्यथोक्तविशेषलाभोर्थः वाऽजन्मग्रहणं कर्त्तव्यं भूततद्भा
वग्रहणाद्यथोक्तार्थपरिग्रहः। विकारशब्दाच्च प्रकृतिविकारभेदविवक्षायां प्रकृतौ विकारावस्थां प्राप्नुवत्यां वर्त्तमानात्स्वार्थे च्विप्रत्ययः समीपादिभ्य इति। प्रकृतिविकारभावाभावान्न
प्राप्नोतीति वचनं। तास्थ्यादिति। असमीपस्थस्य समीपस्थत्वभावात्सिद्धं सूत्रेण प्रत्यय इत्यर्थः। समासांतग्रहणमिति समीपवचनमंतशब्दं मत्वा प्रश्नः। अवयववचनाश्रयेणोत्त एम॰
रमाह। अंतो यथा स्यादिति। इतरो गृहीताभिप्राय आह॥ ॥ ॥ ९७

संपद्यमानद्वति वक्तव्ये संपद्यकर्त्तरीत्युक्त्या निरुक्तमभूततद्भावो लभ्यते इति वार्त्तिककारेण न कर्त्तव्यमिति लाघवानुमानात्पक्षांतरमाह अथवेति। ... संपद्यमानत्वेनाभाति। अभूततद्भावग्रहणात् अभूततद्भावत्वात्संपद्यकर्त्तृग्रहणात्

नैतदस्तीति॥ इतरोऽभिप्रायं प्रकाशयन्नाह॥ इदं तर्हीति॥ ॥श्री ॥श्री ॥७॥ ॥७॥ ॥७॥ ॥७॥

नैतदस्ति प्रयोजनं। प्रत्ययपरत्वेनाप्येतत्सिद्धं॥ इदं तर्हि प्रयोजनं॥ तद्धहरणे नग्रहणं यथा स्यात्॥ कानि पुनस्तद्धहरणस्य प्रयोजनानि प्रयोजनमव्ययीभावद्विगुद्वंद्वतत्
पुरुषबहुव्रीहिसंज्ञाः॥ अव्ययीभावः प्रयोजनं प्रतिराजं उपराजं अव्ययीभावश्चेत्समासो नपुंसकलिंगो भवतीति नपुंसकलिंगता यथा स्यात्॥ नैतदस्ति प्रयोजनं॥
लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्य। इदं तर्हि प्रयोजनं। नाव्ययीभावादतोऽम्त्वपंचम्याः इत्येष विधिर्यथा स्यात्॥ अव्ययीभाव॥ द्विगु॥ द्विगुसंज्ञा च प्रयोजनं। पंच
गवं दशगवं। द्विगुश्च समासो नपुंसकलिंगो भवतीति नपुंसकलिंगता यथा स्यात् नैतदस्ति प्रयोजनं। लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्य॥ इदं तर्हि प्रयोज
नं द्विपुरी त्रिपुरी द्विगोरकारान्तादिति ईकारो यथा स्यात्॥ एतदपि नास्ति प्रयोजनं। पुरशब्दो यमकारान्तः। तेन समासो भविष्यति॥ आतश्चाकारान्तः॥ एवं ह्याह॥ इ
मे स्म भिक्षे कृतसंचयानि पुराणि राज्ञां विनयंति कोपमिति॥ इदं तर्हि प्रयोजनं द्विधुरी त्रिधुरी। द्विगोरकारान्तादिति ङीप् यथा स्यात् द्विगु॥ द्वंद्व॥ द्वंद्वसंज्ञा
च प्रयोजनं। वाक्त्वचं। स्रक्त्वचं। द्वंद्वश्च समासो नपुंसकलिंगो भवतीति नपुंसकलिंगता यथा स्यात्। नैतदस्ति प्रयोजनं लिंगमशिष्यं लोकाश्रयत्वा
ल्लिंगस्य॥ इदं तर्हि प्रयोजनं॥ कोशश्च निषच्च कोशनिषदं [redacted] कोशनिषदिनी द्वंद्वोपतापगर्ह्यात्प्राणिस्थादिनिरिति इनिर्यथा स्यात्॥ द्वंद्व॥
तत्पुरुष॥ तत्पुरुषसंज्ञा च प्रयोजनं॥ परमधुरा उत्तमधुरा परवल्लिंगं द्वंद्वतत्पुरुषयोरिति परवल्लिंगता यथा स्यात्॥ नैतदस्ति प्रयोजनं॥ उत्तरपदार्थ
प्रधानस्तत्पुरुषः॥ इदं तर्हि प्रयोजनं अर्द्धधुरा॥ एतदपि नास्ति प्रयोजनं। लिंगमशिष्यं लोकाश्रयत्वात् लिंगस्य इदं तर्हि निर्धुरः॥ अव्ययं तत्पुरुषे
प्रकृतिस्वरं भवतीत्येष स्वरो यथा स्यात् तत्पुरुष॥ बहुव्रीहि॥ बहुव्रीहिसंज्ञा च प्रयोजनं उच्चधुरः नीचधुरः॥ बहुव्रीहौ प्रकृत्या पूर्वपदं भवतीत्ये
ष स्वरो यथा स्यात्॥ श्री ॥७॥ ॥

=किं क्षेपे इत्यनेन विहितः समासोऽग्रस्थेन न तु षष्ठीत्यनेन विहितः ।१५= =बहुव्रीहौ संख्येये डजबहुगणात् ॥१८=

न पूजनात् इदं विप्रतिषिद्धं को विप्रतिषेधः। परिगणिताभ्यः प्रकृतिभ्यः समासांतो विधीयते। न च तत्र काचित् पूजनांता प्रकृतिर्निर्दिश्यते।
नैतद्विप्रतिषिद्धं। नैवं विज्ञायते। याभ्यः प्रकृतिभ्यः समासांतो विधीयते न चेत्ताः पूजनांता भवंतीति। कथं तर्हि। न चेत्ताः पूजनात्परा भवं
तीति॥ पूजायां स्वतिग्रहणं कर्त्तव्यं। सुराजा अतिराजा। किमाभूत् परमगवः। उत्तमगवः॥ प्राक् बहुव्रीहिग्रहणं च। प्राक् बहुव्रीहिग्र
हणं च कर्त्तव्यं। इह मा भूत्। स्वक्षः अत्यक्षः इति। किमः क्षेपे। क्षेप इति किमर्थं। कस्य राजा किं राजः। क्षेप इति शक्यमकर्त्तुं कस्मान्न
भवति कस्य राजा किं राज इति। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैवेति। बहुव्रीहौ संख्येये डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं
निस्त्रिंशाद्यर्थं। डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं कर्त्तव्यं॥ किं प्रयोजनं। निस्त्रिंशाद्यर्थं। निस्त्रिंशानि वर्षाणि। निश्चत्वा
रिंशानि वर्षाणि। अन्यत्राधिकलोपात्। अन्यत्राधिकलोपादिति वक्तव्यं॥ इह मा भूत्। एकाधिका विंशतिः॥ एकविंशतिः। द्व्यधिका
विंशतिः। द्वाविंशतिः। अव्ययादेरिति च वक्तव्यं। इह मा भूत्॥ गोचत्वारिंशदिति॥ तत्तर्हि वक्तव्यं। यद्यप्येतदुच्यते॥ अथ वैतर्हि अन्य
त्राधिकलोपादित्येतन्न क्रियते॥ ॥ श्री ॥ श्री ॥

ऋक्पूरब्धूः॥ कथमिति। यद्यक्षइति स्वरूपग्रहणम् अक्षे सर्वे पदे धुरन्तात् समासान्तो न भवतीति तदा नचेदक्षधुरन्तः समासइत्ययं पक्षो भवति॥ यदा त्वक्षइत्यर्थग्रहणं तदा नचेद
क्षः समासार्थइत्ययं पक्षउभयथा च दोषप्रसंगइति प्रश्नः॥ अक्षधुरन्त इत्यस्यायमर्थो अक्षशब्दस्य यः समीपे धूःशब्दः तदन्तः समास इति॥ नचेदक्षस्य धूरिति अक्षस्य धूरूपे क्षया
धिकरणत्वात् अनक्षइत्यधिकरणसप्तमी च कसंबन्धः कारकविशेषः शकटावयवोऽक्षः॥ अक्षो। अदर्शनादितिवचनादर्शी वा क्षीत्यक्षिमदर्शार्थग्रहणमिति हाक्षिशब्द उपादानः

ऋक्पूरब्धूः॥ अनक्षइति कथमिदं विज्ञायते॥ नचेदक्षधुरन्तस्समास इति॥ आहोस्वित् नचेदक्षः समासार्थ इति किंचातः॥ यदि विज्ञायते॥ नचेदक्षधुरन्तः
समास इति॥ सिद्धमक्षस्य धूः अक्षधूरिति॥ इदं तु न सिध्यति॥ दृढधूरयमक्षः॥ अस्तु तर्हि नचेदक्षः समासार्थ इति सिद्धं दृढधूरक्ष इति॥ इदं तु न सिध्यति
॥ अक्षस्य धूः अक्षधूरिति॥ एवं तर्हि नैवं विज्ञायते अक्षधुरन्तः समास इति नापि नचेदक्षः समासार्थ इति॥ कथं तर्हि नचेदक्षस्य धूरिति। एवं च कृत्वाना
पि नचेदक्षधुरन्तस्समास इति विज्ञायते नाप्यक्षः समासार्थ इति। [redacted] अथ चोभयोर्न भव
ति॥ अक्षणो दर्शनात्॥ अदर्शनादित्युच्यते॥ तत्रेदं न सिध्यति॥ कं बाक्षं अदर्शनाद् इति शकपमकपतं॥ कथं ब्राह्मणाक्षि॥ अप्राण्यंगादितिवक्तव्यं॥

=लवणमक्षीवेसुपमितसमासः॥१८=

लवणाक्षमिसाद्युदाहरणांदर्शनवाचिलेनुब्राह्मणाक्षीसादौ समासांता भावः कंबराक्षमिति॥ अप्राणिनां बहुव्रीहिः कं मुखाबरणामुच्यते तेनाप्राणाः पश्यंतीति दर्शनत्वात् समा
सांताप्रसंगः एवं गवाक्षेपि॥ अप्राण्यंगादिति तेन गवाक्षकंबराक्षेसिध्यतः॥ श्री ॥श्री ॥ श्री॥ ॥श्री॥ ०॥

अचु॥ अद्रष्टचतुर्णामिति। अर्थप्रदर्शनमेतत्। दृष्टानि चत्वार्यस्येति। अन्यपदार्थे बहुव्रीहयः। आद्यास्त्रयः कर्मधारयाः। अह्नो। अह्नश्च चतुर्नार्थकमिति॥ अन्हए
नेभ्यः इत्येतावत् सूत्रमज्विधानार्थकं नेंटजचोरत्र विप्रतिषेधाभावात्॥ एतान्हाहः पुंसीति वचनात्। स्त्रियां वृत्त्यभावात्। नत्रान्हष्टखोरेवेति नियमाट्टिलोपाभावात्। द्वत्वो

अचतुरविचतुरसुचतुरा। आद्यास्त्रयो बहुव्रीहयः। अद्रष्टा चतुर्णां अचतुरः। विद्रष्टा चतुर्णां विचतुरः। सुद्रष्टा चतुर्णां सुचतुरः। ततः परे एकादश
द्वंद्वाः। स्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवऊर्वष्ठीवपदष्ठीवनक्तंदिव रात्रिंदिव अहर्दिव ततो व्ययीभावः। सहरजसा सर
जसं। ततस्तत्पुरुषः निश्चितं श्रेयो निःश्रेयसं। ततः षष्ठीसमासः। पुरुषस्यायुः पुरुषायुषं। ततो द्विगू द्वे आयुषी द्व्यायुषं त्रीण्यायूंषि त्र्यायुषं
ततो द्वंद्वः ऋक्यजुः ऋग्यजुषं। जातादयउक्षांताः समानाधिकरणाः जातः उक्षा जातोक्षः। महान् उक्षा महोक्षः। वृद्ध उक्षा वृद्धोक्षः॥
ततो व्ययीभावः। शुनः समीपं उपशुनं। ततः सप्तमीसमासः। गोष्ठे श्वा गोष्ठश्वः। चतुरो अकारेण त्र्युपाभ्यामुपसंख्यानं॥ चतुरः अ अकार
णे त्र्युपाभ्यामुपसंख्यानं कर्त्तव्यं॥ त्रिचतुराः। उपचतुराः। ब्रह्महस्तिभ्यां वर्चसः। पल्यराजभ्यां चेति वक्तव्यं। पल्यवर्चसं। राजवर्चसं। अहः
सर्वैकदेश। अहर्ग्रहणं द्वंद्वार्थं द्रष्टव्यं किमुच्यते द्वंद्वार्थमिति॥ न पुनस्तत्पुरुषार्थमपि स्यात्। तत्पुरुषाभावात्॥ न हि रात्र्यंतोऽहरादिस्तत्पु
रुषोस्ति। अन्हो न्हएतेभ्यः। अन्होन्हवचनार्थकं चान्हष्टखोर्नियमवचनात्। अन्होन्हवचनमनर्थकं। किं कारणं। अन्हष्टखोर्नियमवच
नात् अन्हष्टखोरेवेसेत नियमार्थं भविष्यति अनसंतान्नपुंसकाच्छंदसीति अनसंतान्नपुंसकाच्छंदसीति चेति वक्तव्यं। ब्रह्मसामं ब्रह्मसाम देवछंदसं

९ देवछंदः॥ ॥ श्री ॥७॥

पेनप्रवो ह्लादयः सिद्धा इति नार्थोन्हादेशविधाने नेसर्थः॥ ॥श्री ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

बहु॰। अनन्तोदात्तार्थमिति सक्थ्यं चाक्रान्तादिति विभाषान्तोदात्तत्वं विधीयते तत्राऽन्तोदात्तात् ङीषः ङीषो नोत्ति विशेषो ङीप उदात्त निवृत्ति स्वरेणोदात्तत्वाद्यदा तु पूर्वपद प्रकृति स्वरे
णानुदात्तत्वं तदा ङीषि सति ईकारस्योदात्तत्वं भवति ङीपि तु सत्यनुदात्त ईकारः स्यादित्यर्थः। चक्रसक्थीति अपपुस्तकोयं पाठो न त्वयं ...क्रान्तादिति विकल्प निषेधाच्चित्वान्नित्ये नान्
तोदात्तत्वेन भाव्यं तस्माद्गौरसक्थीत्यन्तोदात्तत्वाभावपक्षस्योदाहरणम्॥ ॥द्वित्रिभ्यां॥ ॥द्विमूर्द्ध इति यद्यत्र षच्स्यात्तदा चित्वान्नित्यमन्तोदात्तत्वं स्यात् द्वित्रिभ्यां
=सक्थशब्दस्य जं तो तोदात्तो भवति क्रान्तान्तात्पर स्वेन भवतीति सक्थं चाक्रान्तादिस्यार्थः।२=

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्। किमर्थं षच् प्रसयान्तरं विधीयते। न टच्प्रकृतः सोनुवर्त्तेत। अन्तउत्तरं पठति। षचि प्र
सयान्तकरणमनन्तोदात्तार्थं। षचि प्रसयान्तरं क्रियते। अनन्तोदात्ताः प्रयोजयन्ति चक्रसक्थं चक्रसक्थी
॥ ॥द्वित्रिभ्यां षमूर्द्धः किमर्थं मूर्द्धन्ः षः प्रसयान्तरं क्रियते न प्रकृतः सोनुवर्त्तते मूर्द्धन्च षव चनं किं। अनन्तोदा
त्तार्थमित्येव द्विमूर्द्धः त्रिमूर्द्धः॥ ॥श्री॥ ॥०॥

=वितरणसामर्थ्यात्पूर्वपदप्रकृतिस्वर मात्रं बाध्यते॥१=

यादृन् मूर्द्धस्य बहुव्रीहाविति तु विभाषान्तोदात्तत्वं यदा समासान्तविधेरनित्यत्वात् द्विमूर्द्धेति समासान्ताभावः तदा सावकाशं षेनु सति समासान्ते पक्षेपि पक्षेन्तोदात्तत्वं प
क्षे पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमिति स्वाद्यसिद्धेः॥ ॥श्री ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ०ः

अपूरणी। कल्याणपंचमीकः पक्ष इति। अत्र वृत्तिपदार्थे एव पूरणीन त्वन्यपदार्थेः। पक्षस्य तिरोहितावयवभेदस्यान्यपदार्थत्वाद्यथा रक्ष इ समस्य शब्दस्यावयव्यभिधेयो न
तु शाखादयोवयवा अनुमीयमानस्या शाद्यार्थत्वादिस प्राधान्यं पूरणाः कल्याणी पंचमा इति अत्रावयवे न विग्रहः समुदाये भेदः समासार्थः इति रात्रिषु पंचम्या अंतर्भावात्
उद्धृतावयव०

अप्पूरणीप्रमाण्योः। अपि प्राधानपूरणीग्रहणं। अपि प्रधानपूरणीग्रहणं कर्त्तव्यं। प्रधानं या पूरणीति वक्तव्यं। इह मा भूत्। कल्याणी
पंचमी अस्य पक्षस्य कल्याणपंचमीकः पक्षः। अथेह कथं भवितव्यं। कल्याणी पंचमी आसां रात्रीणामिति कल्याणी पंचमा रात्रय इति
भवितव्यं। तत्र योऽत्र प्रधानां नेतुर्नक्षत्रे उपसंख्यानं नेतुर्नक्षत्रे उपसंख्यानं कर्त्तव्यं। पुष्यनेत्राः। मृगनेत्राः छंदसि च। नेतुरुपसं
ख्यानं कर्त्तव्यं। बृहस्पतिनेत्राः सोमनेत्राः। मासात् भृतिप्रत्ययपूर्वपदाट्ठञ्विधिः मासाद्भृतिप्रत्ययपूर्वपदात्ठन्विधेयः पंचकमा
सिकः षट्कमासिकः। दशकमासिकः अंजनासिकायाः संज्ञायां। खरखुराभ्यां नस्वक्तव्यः खरणाः खुरणाः शितिनाः अर्चनाः अ
हिनाः इति नैगमाः शितिनाः अर्चनाः अहिनाः। उपसर्गाच्च बहुलं वक्तव्यः। विग्रः ख्यश्च वक्तव्यः। विख्यः। ऊर्ध्वसोनः। ऊर्ध्वसोनाः।
स्त्रीग्रहणं कर्त्तव्यं॥ इह मा भूत्। महोधाः पर्जन्य इति॥ ॥ ॥

न्यपदार्थत्वान्नप्राधान्यं पूरणाः पंचकमासिक इति पंचमति रस्य मासस्य पंचको मासः सोस्यांशवस्नभृतय इति संख्यायाः कन् पंचको मासोस्येति बहुव्रीहौ कृते स्वार्थे ठञ् च॥ एम०
अञ्चनासिखरखुराभ्यामिति आदेशप्रत्यययोः प्रसंगे केवलादेशविधानार्थं वचनं उपविग्र इति। विगता नासिकायस्य स विग्रः॥ ॥ ॥ १००

गंधं। गंधशब्दोस्ति द्रव्यवाची गंधान् पिनष्टीति। अस्ति च गुणवाची चंदनस्य गंध इति॥ तत्र गुणवाचिग्रहणार्थमाह। गंधस्येत्व इति। रूपादिसमुदायात्मकस्य द्रव्यस्य गंधल
क्षणो गुण एकांतो भवति। रूपादिव्यतिरिक्तावयविद्रव्यवादिपक्षे त्वेकांत इवैकांतस्तत्स्थस्योपलंभादित्याश्रीयते॥ यदनुगतमिति। अनुगतं निलीनमविभागापन्नं
कुंकुमादि परागदेवदत्तादेर्भवति। तदात तत्स्थत्वात् गंधस्यैकांतत्वादित्वं भवति। प्रविशीर्णमिति विभागेनावस्थितं देवदत्तादेः पृथगुपलभ्यमित्यर्थः॥ शेषात्॥ कः शेष इ

=आपणेत्रिसुकः।१=

गंधस्येदुत्पूति। गंधस्येत्वे तदेकांतग्रहणं। गंधस्येत्वे तदेकांतग्रहणं कर्तव्यं इह मा भूत्। मनाग्गंधोऽस्य सुगंधः आपणिक इति। अथ्यानुलिप्ते
कथं भवितव्यं॥ यदि तावद्यदनुगतं तदभिसमीक्षितं सुगंधिरिति भवितव्यं। अथ यत्प्रविशीर्णं सुगंध इति भवितव्यं। शेषाद्विभाषा॥ शेषादि
त्युच्यते। कः शेषः। याभ्यः प्रकृतिभ्यः समासांतो न विधीयते स शेषः। किमर्थं पुनः शेषग्रहणं क्रियते। याभ्यः प्रकृतिभ्यः समासांता वि
धीयंते ताभ्यः कप्मा भूदिति॥ नैतदस्ति प्रयोजनं॥ ये प्रतिपदं विधीयंते ते तत्र बाधका भविष्यंति॥ अनवकाशा हि विधयो बाधका भवंति॥
सावकाशाश्च समासांताः कोऽवकाशः विभाषा कप्॥ यदानकप्सोऽवकाशः। कपः प्रसंगे उभयं प्राप्नोति। परत्वात्कप्प्राप्नोतीति नस्माच्छे

=तस्माच्छेवल्पमाणवालः१=

ति॥ अनेकस्योपयुक्तत्वात्किमपेक्षः शेष इत्याश्रीयत इति प्रश्नः। इतरः सामान्येनाह याभ्य इति। समासांतविशेषस्तु न प्रदर्शितः। किमर्थमिति सामान्येन विभाषाक
ब्विधीयतां तस्य विशेषसमासांता बाधका भविष्यंतीति प्रश्नः॥ परत्वात्कप्प्राप्नोतीति उपदेशः इत्यादिषु निसंडजादयश्च श्यंते॥ ॥ श्री

किंपुनरिति॥ पूर्वं यास्यः प्रकृतिस्यः इति सामान्येनोक्तं ततो विशेषज्ञापनाय प्रश्नः। यद्यपि कृद्वपेक्षे शेषत्वे शेषग्रहणमनर्थकं अंतरेणापि शेषग्रहणमशेषान्नि
त्यं कृद्विधानसामर्थ्याद्विभाषितकप्प्रसंगाभावात् छेषादेवकृद्विकल्पवित्तानान्तथापि विचारमात्रं क्रियते। अन्तश्च इति। उक्तं गताकप्त्र विहित इति शेषत्वात्पक्षे
परत्वात्कप्प्रसंगः कृद्भावपक्षस्त्वकारस्यावकाशः समासांतस्य च विशेषणं तदिति तत् एव विशेषविषयाद्वचनात्कप्न भविष्यतीत्यर्थः॥ तस्मिन्क्रियमाणोपी

= शिष्यबुद्धिवैशद्यायेत्यर्थः।१ =

किंपुनरिदं शेषग्रहणं कृद्वपेक्षं यस्माद्बहुव्रीहेः कप्[वि]विहित इति। आहोस्वित्समासांतापेक्षं यस्माद्बहुव्रीहेः समासांतो न विहित
त्यत्रापि२ इति॥ किं चातः यदि विज्ञायते कृद्वपेक्षं अनृचो बह्वृचः प्राप्नोति अथ समासांतापेक्षं अनृचकं साम बह्वृचकं सूक्तमिति न सिध्य
ति। अस्तु कृद्वपेक्षं। कथमनृचो बह्वृच इति विशेषणं तदुक्तं अनृचो माणवो बह्वृचश्चरणाख्यायामिति। तर्हि उभयोस्तन
१ डि: स्त्रीग्रहणं चोदितं। तस्मिन्क्रियमाणेपि प्राप्नोति॥ ॥ ॥

ति। क्रियमाणे स्त्रीग्रहणे कुंडोध्नीसत्र पक्षे परत्वात्कप् प्राप्नोति क्रियमाणेपि स्त्रीग्रहणे तस्य पुंनपुंसकनिवृत्त्यर्थत्वात् पक्षे परत्वात्कपः प्रसंग एव एतच्चोद
हरणमात्रमुपदर्शितं दिशु पक्षे कप्प्रसंगात्॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

४६९

भा०कै०५ नैवककप्पेक्षमिति। शेषग्रहणानर्थक्यप्रसंगात् यस्मात् क्वचिन्निसः कप् विहितस्तस्मात्क्विमापानप्राप्नोतीति विरोधादिति पूर्वोक्तन्यायात्समासान्तापेक्षमपि न भवति अन्‍तृकं बह्वृक्कमिसत्र कपो
१०२ प्रसंगात्॥ अनंतबहुव्रीह्यधिकार इति। एवं च बहुधन्वानः इत्यनंतरे बहुव्रीह्यधिकारे न ङः विधानात् कुड्डौ ध्वनिसारौ स्त्रियां कप्प्र भवति। कथमनृच इति॥ बहुव्रीह्यधिकारा
त्प्रागकारविधानाच्छेषत्वात्पक्षे कप्प्रसंगः। वक्तव्यमेवैतदिति॥ यद्येवं समासान्तापेक्षे पि शेषत्वे नृच बह्वृच योर्विशेषवचनादनृचात्र न बह्वृक्कयोः पक्षे कपः
सिद्धत्वात् कस्य चिद्दोषस्याप्रसंगात्किमर्थमनंतरबहुव्रीह्यधिकारापेक्षः शेषः। आश्रीयते बहुव्रीह्यधिकाराच्चेत्तत्सुहृत्पादिभ्यः कपो प्रसंगः किं चोपदेशादि सा
दौ पक्षे कप्प्राप्नोति। अनंतरे बहुव्रीह्यधिकारे उचो विधानात् यथा प्रियपथः प्रियधुर इत्यत्रापि प्राप्नोतीति तस्मात्समासान्तापेक्षमेव शेषत्वमाश्रयणीयमिति चिं

एवं तर्हि नैव कप्पेक्षं शेषग्रहणं॥ नापि समासान्तापेक्षं किं तर्हि अनंतरो बहुव्रीह्यधिकारः सोपेक्ष्यते। अनंतरे बहुव्रीह्यधिकारे यस्माद्बहुव्रीहेः
समासान्तो न विहित इति॥ कथमनृचो बह्वृच इति वक्तव्यमेवैतत् अनृचो माणवो बह्वृचश्चरणाख्यायामिति॥ ईयसश्च। ईयस उपसर्जनदीर्घ
त्वं च। ईयस उपसर्जनदीर्घत्वं चेति वक्तव्यं बहुः श्रेयसोस्य बहुश्रेयसी विद्यमानश्रेयसी॥ पुंवद्वचनात्सिद्धं। पुंवद्भावोत्र भवति ईयसो बहुव्री
हौ पुंवद्वचनमिति॥ ॥इति भगवत्पतञ्जलिविरचिते श्रीव्याकरणमहाभाष्ये पंचमाध्यायस्य चतुर्थे पादे प्रथममाह्निकं॥ पादश्च संपूर्णः पंचमोध्यायः॥
वसंतऽऋतिविरचि

समेनद्भाष्यं। ईयस उपसर्जनदीर्घत्वमिति हूस्वापवादो दीर्घत्वं विधेयं। पुंवद्वचनादिति गोस्त्रियोरुपसर्जनस्येति ह्रस्वः प्राप्तः पुंवद्भावेन निवर्त्यते यथा पुंविषयस्य कारस्य ह्रस्वो
न भवत्येवमीयसः प्रसंग इति श्रवणं भवति बहुश्रेयसी सत्र हल्ङ्याब्भ्य इति लोपे प्राप्ते इदं तेके चित् पठन्ति बहुः हल्ङ्यादिलोपे न न भावं ङ्याप्योः ह्रीप्रत्यययोः ग्रहणात्स्त्री प्रत्यये चानुपसर्ज
नेतरादि नियमाभावादिति उपसर्जनत्वात् ईपत्यत्तरादिनियमाद्धल्ङ्यादिलोपस्य प्रसंगाभावादन्ये त्वाहुः दीर्घग्रहणं तत्र ह्रस्वनिवर्त्यर्थं कृतं तत्र इति खट्वा इत्यादौ लोपो
माभूदिति चोपसर्जनेतरादिनियमः स्यात् तदा ह्रस्वो ल्वोपस्य प्रसंगाभावान्न ङ्यावतमेदीर्घग्रहणं न कुर्यात् कृतं तु यथेष्टमुपसर्जनादपि दीर्घो ल्लोपं ज्ञापयतीति एम०
बहुश्रेयसीति सिद्धमिष्टं इत्युपाध्याय जय्यटपुत्रकैय्यट कृते भाष्यप्रदीपे पंचमोध्यायः॥ ॥समाप्तः॥ ॥शुभमस्तु॥ शुभकल्यानः॥ ॥ १०२
५६२